This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कविकुलगुरु कालिदास संस्कृत विश्वविद्यालय, रामटेक

हस्तलिखित संग्रह

दाखल क्र M 1937 विषय कर्मकाण्ड.

नाव. नृसिंह संस्कार.

लेखक/लिपीकार जगन्नाथभट जोशी.

पृष्ठ 64 काळ शके 1745 पूर्ण/अपूर्ण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्रीगणेशायनमः॥ अथसोमयाजिनोनियमेनसान्नाय्यवतीदर्शेष्टिः॥ असोम
याजिनस्त्विच्छया॥ तत्रचतुर्दश्यांसायंदधिहोमः॥ दर्शेचप्रातर्ग्निहोत्रंहुत्वा
हुतशेषस्थापनं॥ हुतेग्निहोत्रेसपत्नीकोमयजमानः॥ सान्नाय्यवद्दर्शेनाहं
यक्ष्ये॥ तत्राग्निमष्टाकपालेनपुरोडाशेनविष्णुमाज्येनोपांशु॥ इंद्रंसा
न्नाय्येनदध्नापयसान्वाहंयक्ष्ये॥ पौर्णमासवत॥ अग्निविहृत्याग्न्यन्वाधा
नं॥ मांसमैथुनेवर्जयामितिसंकल्पः॥ वपनंवा॥ पंचमहायज्ञाः॥ अपराह्णे
पिंडपितृयज्ञः॥ तत्रदेशकालकीर्तनांतेकृतापसव्यनीविबंधोदक्षिणाभि
मुखः॥ परमेश्वरप्रीत्यर्थेपिंडपितृयज्ञेनाहंयक्ष्ये॥ तत्राग्निमपरेणपात्रासादनं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

राम अपरेणरेखाकरणं॥ एवंतेरलिपिंडदानंसूत्राण्याछादनानि॥ एतान्येकल्पिकपदार्थान गुरु
हंकरिष्ये॥ पिंडपितृयज्ञमंत्राणांप्रजापतिऋषिः॥ अग्नयेकव्यवाहनायसोमायपि
तृमतइतिद्वेयजूंषि अग्निःकव्यवाहनःसोमःपितृमानूक्रमेणदेवते॥ अपहताइति
यजुः अपहताअसुरारक्षांसिदेवता॥ येरूपाणीतित्रिष्टुप्॥ अत्रपितरइति
बृहतीनमोवइतिषट्पञ्चाशल्लिए तद्वइतिचसर्वाणियजूंषि ऊर्जमितिवि
॥१॥ राट्आधत्तइतिगायत्रीसर्वेषांपितरोदेवता॥ पिंडपितृयज्ञहोमेलेखाकरणेउ ॥१॥
ल्मुकचिधानेजपेजलिकरणेजपेसूत्रदानेपानिषेकेमध्यमपिंडप्राशनेक्रमे
णविनियोगः॥ तत्राग्निंकव्यवाहनंसोमंपितृमतंचरणेन॥ गोत्रंअस्मत्पि
तरंअदकशर्माणं॥ अस्मत्पितामहं॥ अदकशर्माणंअस्मत्प्रपितामहंअद

कशर्माणंचरस्त्रोषपिंडैरहंयक्ष्ये॥ अध्वर्युकर्त्तकेयजमानपितृरमित्यादिप्रयोगः॥
दक्षिणाग्निमाग्नेयकोणदक्षिणसंस्थमप्रदक्षिणंदक्षिणाग्नेर्दर्भैःपरिस्तीर्य॥
पात्रासादनमेकशः पूर्ववत्॥ पूर्ववदिध्मनेनपणास्यपश्चादुत्तरतोवा॥ अथ
वक्ष्येत्येतावदतिदिश्यतेदक्षिणाग्निमपरेणोत्तरेणवाप्रागग्रंदक्षिणाबिलंद
क्षिणासंस्थं॥ स्रुचंवा॥ पात्रंवा॥ उलूखलं॥ मुसलं॥ शूर्पं॥ चरुपात्रं॥ उदकं
आज्यं॥ मेक्षणं॥ स्फ्यः॥ उदपात्रं॥ सवृन्दाच्छिन्नानि॥ व्रीहयः॥ सूत्राणिचेति
ततोगार्हपत्यमपरेणदक्षिणामुखः॥ स्रुचिस्थाल्यांवा॥ अपहरंव्रीहीनुत्त
घंडीगृहीत्वादक्षिणाग्निमुत्तरेणोलूखलेदक्षिणामुखस्तिष्ठन्नवहंतितिवि
तुषान्शूर्पेउद्वास्यपराहत्यपुनरुलूखलेओप्यातिष्ठन्नवहंति॥ शूर्पेकृत्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

निष्पूयसदृत्स्फलीकृत्य चरुस्थाल्यामुदकमासिच्य सारं तंडुलान्पितृतीर्थेनो
पदक्षिणाग्नौ वधित्रिः सपवित्रमभिघार्य दक्षिणतउद्वास्याप्रदक्षिणमा
हृत्य॥ अध्वर्युर्मेक्षणेन॥ अग्नयेकव्यवाहनायस्वाहा॥ इतिजुहोति॥ यज
मानः॥ इदमग्नयेकव्यवाहनायनमम॥ पुनरध्वर्युः॥ तदक्षिणे॥ सोमाय
पितृमतेस्वाहा॥ इतिजुहोति॥ यजमानः॥ इदंसोमायपितृमतेनमम॥ मे ॥२॥
॥२॥ क्षणंकुलस्य वामेग्नौप्रास्यति॥ स्फ्येनदक्षिणाग्निमपरेण॥ अपहताऽ
असुरारक्षांऽसिवेदिषद इति दक्षिणाग्नौरेखामुल्लिखति॥ अपउ
पस्पृश्य॥ दक्षिणाग्नेरुल्मुकमादाय॥ येरूपाणिप्रतिमुंचमानाऽअसु
राः संतः स्वधयाचरंति॥ परापुरोनिपुरोयेभरंत्यग्निष्टांल्लोकात्प्रणुदात्य

स्मात्॥ इतिरेखाग्रेनिदधाति॥ अपस्पृश्य॥ उदपात्रमादाय॥ असाववनेक्ष्वे
तियजमानस्यपितृप्रभृतित्रीन्॥ यजमानस्येति॥ गृहणांतिं उपितृयज्ञेप्य
ध्वर्युःकर्त्ताकर्त्ता॥ अदकगोत्रयजमानस्यपितामह अदकशर्मन्॥ अवनेनि
क्ष्व॥ इतिअथाग्रे॥ अदकगोत्रयजमानस्यप्रपितामह अदकशर्मन्॥
अवनेनिक्ष्व॥ इति॥ सकृदाच्छिन्नानिरेखायांकृत्वा॥ यथावनिक्तं
पिंडंददातित्रीन्॥ चरुंत्रेधाविभज्यपिंडानुवृत्त्यैकमादाय॥ अद
कगोत्रयजमानस्यपितः॥ अदकशर्मन्॥ एतत्तेन्नं स्वधा॥ इति
दद्यात्॥ यजमानः॥ इदं अदकगोत्रायास्मत्पित्रे अदकशर्म
णेनमम॥ पुनरध्वर्युः॥ द्वितीयमादाय॥ अदकगोत्रयजमानस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पितामह[illegible]अदकशर्मन्नूएतत्ते न्नं स्वधा॥ इतिदद्यात्॥ यजमानः॥
इदं अदकगोत्रायास्मत्पितामह अदकशर्मणे नमम॥ अध्वर्युः॥ द्वि
तीयमादाय॥ अदकगोत्रयजमानस्य प्रपितामह अदकशर्मन्नूएत
त्तेन्नं स्वधा॥ इतिदद्यात्॥ यजमानः॥ इदं अदकगोत्रायास्मत्प्र
॥२ पितामहाय अदकशर्मणे नमम॥ इतित्यजति॥ अध्वर्युः॥ हस्तं ॥३॥
प्रक्षाल्य॥ अत्रपितरोमादयध्वं यथाभागमावृषायध्वं॥ इति
जपति॥ अपसव्यमाकृत्योदङ्गास्ते आलमनीत्॥ आवृत्य॥
अमीमदंतपितरोयथाभागमावृषायिषत॥ इतिजपति॥

पिंडमूलेवोपरिपूर्ववदवनेजनं॥ नीविंविस्रंस्य॥ षडंजलीन्कुरोति
प्रतिमंत्रं॥ नमोवःपितरोरसाय १ नमोवःपितरःशोषाय २ नमोवः
पितरोजीवाय ३ नमोवःपितरःस्वधायै ४ नमोवःपितरोघोराय ५
नमोवःपितरोमन्यवे ६ नमोवःपितरःपितरोनमोवः॥७॥ इति॥ गृ
हान्नः॥ पितरोदत्तसतोवःपितरोदेष्म॥ इतिजपतिच॥ ततः एत
द्वःपितरोवासः॥ इति त्रीणित्रीणिसूत्राणि॥ प्रतिपिंडंदधाति॥
उदपात्रजलशेषं॥ ऊर्जंवहंतीरमृतंघृतंपयःकीलालंपरिस्रुतं॥
स्वधास्थतर्पयतमेपितॄन्॥ इतिपिंडेपुनिषिंचति॥ पिंडानुद्धृत्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यजमानायप्रयच्छति॥ स्रुचावजिघ्रति॥ अध्वर्युः सदर्भाच्छिन्नान्यग्नेरत्र हे
स्योल्मुकंच॥ सव्येनापस्पृशेत्॥ पत्न्यापुत्रकामाचेत्॥ तस्यैयजमानः॥ अन्नव
घ्रातंमध्यमपिंडंप्रयच्छेत्॥ साचप्राशेणमध्यमपिंडेनसह॥ आधत्तपित
रोगर्भंकुमारंपुष्करस्रजं॥ यथेहपुरुषोसत्॥ इतिमंत्रेणप्राश्नाति॥ ॥४॥
जीवत्पितृकस्यपिंडपितृयज्ञाभावएव॥ ततोदर्शश्राद्धं॥ नित्यश्राद्धंवा॥
ब्रह्मयज्ञः॥ ऋतकारः देवतानैवेद्यं॥ बलिदानं॥ भोजनंच व्रतोपयोगि॥ चतु
॥४॥ र्दश्यांवोपक्रमः॥ भोजनानंतरमध्वर्युः॥ पलाशशाखांवाबहुलपलाशां
मशुष्काग्रांप्रागुदीचीमन्यतमांवा॥ इषेत्वाच्छिनद्मि॥ इतिछिनत्ति॥
ऊर्जेत्वासन्नमयामि॥ इतिसंनमयति॥ अत्रवाव्रतमुपैति॥ यजमानः॥

शाखामादायाध्वर्युः॥ यजमानस्ययावत्सोदोग्ध्योगावस्तावतीभिः॥ षड्भि
र्वावत्सान्स्पृशति स्पृश्यवत्सं शाखया॥ वायवस्थ॥ इत्युपस्पृशति॥
एवंषट्॥ प्रतिवत्संमंत्रः॥ मातृभ्योपाकरोति॥ मातृणामेकां॥ देवोवः॥
सविताप्रार्पयतुश्रेष्ठतमायकर्मणे॥ आप्यायध्वमघ्न्या इंद्रायभागंप्रजाव
तीरनमीवा अयक्ष्मामावस्तेन ईशतमाघशंसो ध्रुवा अस्मिन्गो
पतौस्यातबह्वीः॥ इतिशाखयोपस्पृशति॥ ततःशाखायाःमूलेदेशान्तर
वेषोस्युपवेषोदिषतोग्नीवाउपवेविष्टिवेशां॥ अग्नेसुभगधारयेत्॥ मध्याक
र्षण्या अनपायिनोयथासन्॥ इतिछित्वोपवेषंकरोति॥ पवित्रमस्यां॥
वसोःपवित्रमसि॥ इतिबध्नाति॥ कुशौत्रिवृद्धा॥ यजमानस्यपत्नी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्याहि।। इत्यग्न्यंगारस्यान्यतरस्य पुरस्तात्प्राखामुपगूहति। यवाग्वाखा
यमग्निहोत्रे होमः।। कुतेध्वर्युः।। त्रैवर्णिकं दोग्धारं प्रति।। उपसृष्टां मन्त्र
यात्।। इत्याह।। तेनउपसृष्टा।। इति प्रोक्ते। स्वोरसि पृथिव्यसि। इतिस्था
ल्यादानं।। मातरिश्वनो घर्मोसि विश्वधाऽअसि। परमेण धा
म्नादृंह स्व माव्हामा ते यज्ञपतिर्व्हार्षीत्। इत्यधिश्रयति गार्हपत्ये।
वसोः पवित्रमसि शतधारं वसोः पवित्रमसि सहस्रधारं।। इति ५।।
शाखापवित्रमस्यां मूरोहन् दम्या।। वाग्यतो गां धुक्ष्व।। इति दो
ग्धारं प्रेषयति।। दोग्धा गां दुग्ध्वा।। यजमानान्वारब्धस्थाल्यामासि
च्यमाने अध्वर्युः।। देवस्त्वा सविता पुनातु वसोः पवित्रेण शतधा
५।।

रेण सुप्वा।। इति जपति।। कामधुक्षः।। ति पृच्छति।। तेन।। गंगां।। इति प्रोक्ते।। सावि
श्वायुः।। इत्याह।। एवमितरे द्वे गां धुक्ष्वेत्यारभ्य मारभ्य द्वितीयां दोहयति।।
सा विश्वकर्मा।। इति विशेषः।। एवं तृतीयां दोहयति।। तत्र सा विश्वधाया।।
इति विशेषः।। विसृष्टवाग् उत्तरागाः।। धुक्ष्व। अनन्वारब्धे जपासेके।।
तिस्र एव निःसत्वा दोहयति।। नाधिकाः सर्वे दोहांते ध्वर्युर्दोहनपात्रप
रिक्षालनजलं।। संपृच्य धर्मवरीरुमिणामधूनमाः।। पृचती मधु
नापयो मंत्राधनस्यसातये।। इति पयसि समानयति।। आप यित्वो ध्यस्य
प्राग्दुग्धदोहणपदन्नारं हस्यच्चाभाग ॐ सोमेनात्वनन्ञ्मि।। इत्यनक्ति।। सो
दकेनमन्ययेन।। विष्णोहव्यं ॐ रक्ष।। इत्यपिदधाति।। तृणं निद
धाति श्रीव्याचै।। वत्सापाकरणं।। पूर्ववत् शाखया।। पूर्ववच्छाखोपग

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हवनं॥ इति सायंहोमः॥ अन्यतराग्नेरुद्धरणं॥ प्रातर्यवाग्वा जुहोत्यग्निहोत्रे॥ आग्ने
य एव पुरोडाशः॥ ब्रह्मवरणादि आहरण तर्पणांतो विशेषः॥ अनुदिते प्रक्रमः॥
कपालान्यष्टौ॥ शाखोपवेषः॥ कुम्भ्यामुख्यं तत्र दोहन चतुष्टयं॥ न च्छ॥ नियुंजनं॥
हा दोहनं॥ शाखापवित्रं॥ उखाश्चेति॥ उद्धरणपात्र्येका॥ देवस्य त्वेति निर्वपणमाग्ने
यस्यैव॥ निरूप्याज्यं प्रातर्दोहनमन्यस्मिन् सायंदोहपात्रात्॥ उपसृष्टां प्रब्रू
तादित्यादि परिक्षालनानयनांतं॥ सायंदोहमाहृत्य तस्य स्थापनं॥ पुरो
डाशस्य कृत्वा पदनिर्देशः॥ पुरोडाशमधिश्रयणानंतरं पयोऽधिश्रयणं॥ पयो
वर्जं पर्यग्निकरणं॥ पुरोडाशं च प्रातर्दोहं च श्रपयित्वाभिघार्योद्वास्याग्ने
॥६ यद्दधि पयसां प्राणदानं॥ तत्रैवं द्रगच्छन्ति दध्नः॥ पयसः श्रपमंत्रेण॥ ॥६॥

क्रमेणासादनमालभ्य॥ होतुरावाहने॥ उपांशु विष्णु॥ उच्चैः आवह॥
इंद्राग्नीमावह॥ देवां आज्यपां आवह इत्यादि॥ उच्चैः प्रयाजे स्वाहाग्निं
स्वाहा विष्णुं उपांशु॥ स्वाहेंद्रं स्वाहा देवा इत्यादि॥ आग्नेययागानंतरं
उपांशुयागो वैष्णवः॥ ततोऽध्वर्युः एंद्राग्नं प्रोयानुब्रूहि॥ इत्युक्ते होता॥
इंद्र सानसिं रयिं सजित्वानं सदासहं॥ वर्षिष्ठमूतये भर॥
अध्वर्युः जुह्वामुपस्तीर्य तस्यामेव घृतीति ...॥ पयसो
द्विरवदाय ततो दध्नो द्विरवदाया भिघार्य प्रत्यभिघार्यातिक्रम्या
श्राव्याह॥ इंद्राग्नी यज होता॥ ये३ यजामहे इंद्र प्रसक्ष्महि पेपुरहन्तम
नू ज्येष्ठस्ते शुष्मरहरातिरस्तु॥ इंद्रा भर दक्षिणेना वसूनि पतिः
सिंधुनामसि रेवतीनां॥ वौ३षट्॥ अध्वर्युर्जुहोति॥ इदमिंद्राय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नमम॥ इतियजमानः॥ स्विष्टकृति॥ प्रिया धामान्ययाट्॥ उपांशु ७॥
विष्णोः प्रिया धामान्ययाडिंद्रस्य प्रिया धामान्ययाट् देवानामित्या
दि॥ प्राशित्रभागश्चतुर्धाकरणानि न दधिपयसोः॥ शाखापे
वित्रेण सह पवित्राभ्यां मार्जनं॥ तत्स्थापनं शाखायामेव॥
व्यूहने॥ अग्नेर्विष्णोरिंद्रस्योज्जितिमनु इति॥ अग्निर्वि
ष्णुरिंद्रस्तमपनुदंतु॥ इतिच॥ सूक्तवाके॥ अग्निरिदं
हविः उपांशु॥ विष्णुः इदं हविः॥ इंद्र इदं हविः॥ वोदे
रस्यादि॥ सह शाखाया प्रस्तरानु प्रहरणं॥ परिधिषु हू
७॥ यमानेषु अग्नीत्॥ उपवेषं जुहोमित्याभगसोभगायपुरत्नमे

पुरस्तादन्वस्य॥ इतिजुहोति॥ पौर्णमासवद्दन्यदस्य घेः॥ पौर्णमा
सपोवापातरित्यामन्वाधानादिसघऊंतदिह नभवति अन्यत्सर्वं पौ
र्णमासवत्॥ सोमयाजी सन्नूत्ये त्कामादितरस्त्रिंशत्वर्षाणि दर्शपौ
पौर्णमासाभ्यां यजेत पंचदशदाक्षायणयज्ञाग्निहोत्रमेवं वा जुहुया
त्॥ एवशब्दरवार्थे॥ तेन यावज्जीवमग्निहोत्रं जुहोति॥ इतियाव
ज्जीवं दर्शपौर्णमासापक्षे पंचदशवर्षान्नंतरं केवलमग्निहोत्रमेव
जुहुया भ्यां यजेतरस्यार्थः॥ केचित्तु प्रावृत्तदर्शपौर्णमासपक्षे
त्रिंशद्वर्षानंतरं दाक्षायणाणुकदर्शपौर्णमासपक्षे पंचदशवर्षा
नंतरं केवलमग्निहोत्रमेव जुहुयात्॥ इतिव्याचक्षते॥ इतिस्था

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायपक्षः॥ अथ सूत्रकारेणान्वारंभणीयेष्ट्यनंतरं इन्द्रायविमृधएका 8
दशकपालपौर्णमासमन्वादिविकल्पआदित्यश्चरुरामावास्यां॥ स्य
नुर्वपिउक्तः सत्वत्रैवानुष्ठानसौकर्यार्थमुच्यते॥ पौर्णमासेअनुपौर्ण
मासेविसमाप्यनंतरं उद्धरणादिकर्मापवर्गात् इन्द्रायविमृधएका
दशकपालः पुरोडाशो भवति॥ अयंच पादिविकल्पः॥ आदावारभ
एवक्रियतेचेषावल्लीवंकर्त्तव्यं एव॥ तथैवआदित्यश्चरुः आमा
वास्यं अमावास्येष्ट्यनंतरं पुनरुद्धरणादि भवति॥ तत्रवेमृधे
ग्रहणप्रोक्षणप्रादानानुवाचनयाजनव्यूहेषु यथादेवतम्॥
8 अध्वैवान तथा होत्रे आवाहनोत्तमप्रयाजे स्विष्टकृत्सूक्तवाके

षुच॥ एवंसर्वत्र॥ विनः इन्द्र मृधोजहि नीचा जहि पृतन्यतः॥ यो
अस्माँ अभिदासत्यधरं गमयातमो॥ इति पुरोनुवाक्या॥ ये०य
जामहे इन्द्र वैमृधं मृगोनभीमः कुचरोगिरिष्ठाः परावत आजगं
थापरस्याः॥ सृकं संशाय पविमिन्द्रतिग्मं विशत्रून्ताढि विमृ
धोनुदस्वा वौषट्॥ इति याज्या॥ अमावास्यादित्यचरौ॥ सु
त्रामाणं पृथिवींद्यामनेहसं सुशर्माणमदितिं सुप्रणीतिं॥
दैवींनावं स्वरित्रामनागसमस्रवन्तीमारुहेमास्वस्तये॥ इति
पुरोनुवाक्या॥ ये०य जामहे॥ अदितिंमहीमूषु मातरं सुव्रता
नामृतस्य पत्नीमवसे हुवेम॥ तुविक्षत्रामजरंतीमुरूचीं सु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शर्म्मासिमदितिं॥ सुप्रणीतीः॥वौषट्॥ इतियाज्या॥ अत्र वक्ष्यमाधा
नादिन्द्रो ष्टिविहितसप्तदशसामिधेन्योवितन्वंतावाज्यभागोच कर्त्तव्यो॥
कपालोवैषोपसृजे॥ सुब्रुहरपात्रीपेषणसंयवनप्रथनाद्भिरभिमर्शना
भिवासमाप्योदकनिनयनाभावः॥ चरोरुपकल्पनं च॥ इत्यनुनिर्वापपक्षः॥
अथ दर्शपौर्णमा[illegible]सयोरेव दाक्षायणयज्ञः॥ प्रजापश्चर्यन्नयशः
कामस्येति गुणविधत्वेन दर्शपौर्णमासो विहितो॥ तत्र पौर्णमास्या
दाक्षायणयज्ञेनयक्ष्यमाण पूजानांदीश्राद्धं चाहं करिष्ये॥ तत्र त्वा
पंचदशवर्षगुणविधत्वाभ्यांदाक्षायणयज्ञाभिधानाभ्यां दर्श
पौर्णमासाभ्यामहं यक्ष्ये॥ तत्रादावन्वारंभणीयेष्ट्यांयक्ष्ये॥

१२॥

अन्वारंभणीया॥ पुनरुद्धृत्य॥ एकादशकपालोग्निषोमीयो ब्राह्म
णतर्पणांतः॥ हिरण्यं वा दक्षिणा॥ तस्मिन्नहनि॥ हिरण्यमस्य
र्जमयि धेहीति विशेषः॥ पुनरुद्धृत्याग्न्यन्वाधानं॥ मांसमैथुने व
र्जयामि॥ इतिसंकल्पः॥ वपनं वा॥ अपराह्णे व्रतोपायनीयान्तं
शाखाच्छेदनादुपगूहनांतं पूर्ववत्॥ सायमनीयतद्रव्येण स्वयं होमः॥
उपसृष्टाधानयनांतो होमः॥ प्रातर्ब्रह्मवरणादि ब्राह्मणतर्पणां
ते विशेषः॥ अष्टौ कपालानि॥ शाखापवेषः॥ अन्यत्सर्वमुपांशु
यागं विना सान्नाय्यवत्॥ अग्नेयया गानंतरं ऐंद्रं दधिपयसा
चैंद्रो यागः॥ अग्नीषोमीयः॥ पौर्णमास्यामैंद्राग्नो मावास्यायां॥

सान्नाय्यवत्प्रातरमावास्यायां पयस्या मैत्रावरुणीति अमावास्या १०
यां विशेषस्य वक्ष्यमाणत्वात्पौर्णमास्यामेवानेन सूत्रेणोच्यत इ
ति प्रतीयते तेन प्रातः पौर्णमासी प्रतिपदि सान्नाय्यवत्कर्म भवति॥
तत्राग्नेयः पुरोडाशः दधिपयसी च हवींषि इंद्र ऽग्निदेवता एवं भ
वतीत्यर्थः॥ एवं चोपांशुयजो न भवति॥ संप्रदायमते तु दध्नै
वैंद्रो यागः न पयसा पितृमते पिनोपांशुयागः॥ अनुनिर्वापय
श्रेण तत्समाप्यनंतरं वैमृधो यागोन्वाहार्यो दक्षिणा॥ मांस
स्यनृतरजकवासांसि वर्जयेत्॥ आप्रयोगसमाप्तेः॥ पौर्ण
१०। मासीत आरभ्यामावास्यांतरित्यर्थः॥ तथामावास्यायामुद्धरण

दिब्राह्मणतर्पणांतं ऐंद्राग्नो द्वादशकपालः हिरण्यं वा दक्षिणा॥
पुनरुद्धरणं अन्वाधानं॥ मांसमैथुनं वर्जयामि॥ इति संकल्पः॥
वपनं वा॥ अपराह्णे पिंडपितृयज्ञः दर्शश्राद्धं॥ व्रतोपायनीयाशन
मतृप्त्या॥ शाखाच्छेदनं॥ सन्नमनं॥ उपवेषनिष्पत्तिः पवित्रबंधनं॥
रात्रौ स्वयमेवाग्निहोत्रहोमः॥ वत्सापाकरणं॥ देवो व इति मंत्रे
मित्रावरुणयोर्भागमिति विशेषः॥ शाखोपमूलनं॥ प्रात
र्मिलवरणादिब्राह्मणतर्पणांते विशेषः॥ प्रातरमावास्यायां
पयस्या मैत्रावरुणी तत्रैव दोहनं मंते वाध्यानयानीति सू
त्रे॥ तत्रैव तस्मिन्कुंभ्यां दधि न्येवाज्य निर्वापानंतरं पय

स्यार्थं दोहनं कर्त्तव्यं ॥ अथवा तत्रैव प्रातरेव न सायमिति ॥ ११
मृतेवा दध्यायत्ति ॥ अथवा मृते प्रातर्दोहे लौकिकं दध्यानप
तीति वा शब्दो विकल्पार्थः ॥ कपालान्यष्टौ ॥ शाखोपवेषः ॥ कु
शमुष्ट्यनंतरं ॥ निर्वृंजनं ॥ दोहनं ॥ शाखापवित्रं ॥ उखा चे
ति दोहनचतुष्टयं ॥ उद्धरपापात्र्येका ॥ ततो वाजिनभांडं ॥ अ
न्वाहार्यस्थाने हिरण्यं वा ॥ लौकिकदध्न्योपकल्पनं ॥
निरुप्याज्यमन्यस्मिन्परिक्षालनांतं कृत्वा मृते वा दध्यानयति ॥
दधिनिर्वापयः ॥ तद्वर्जं पर्यग्निकरणं ॥ पात्र्याः समार्गनंतरं
वाजिनभांडस्य संमार्गः ॥ आग्नेयाभिघारणं ॥ तत्रस्थाभि
११ घारं दत्वैवोपस्तीर्णे वाजिननिषेकः ॥ प्राणदाने मित्रावरुणो ॥

गच्छेति ॥ पयस्या अनंतरं प्राणदानं वाजिनस्य वाजिनो गच्छेति ॥
अनास्यलिप्तं वेति पक्षे तस्याभिघारणं प्राणदानोपस्तारा
भिघारणानामभावः ॥ हविरासादनं वेद्यां ॥ वाजिनस्योत्करे
ण मंत्रेण हविरालंभनानंतरं मंत्रेण वाजिनस्य ॥ होतुरा
वाहने ॥ आज्यभागा देवतानंतरं ॥ अग्निमावह ॥ मित्राव
रुणावाऽवह ॥ वाजिनो नावाहयति ॥ देवां इत्यादि ॥ उत्तमे
प्रयाजे स्वाहाग्निं स्वाहा मित्रावरुणौ स्वाहा देवां इत्यादि ॥
आग्नेयेन प्रचर्य ॥ पयस्यायागः ॥ आ नो मित्रावरु
णा घृतैर्गव्यूतिमुक्षतम् ॥ मध्वा रजांऽसि सुक्रतौ ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिपुरोनुवाक्या ॥ ओ३ यजामहे मित्रावरुणौ प्रबाहवा सिसृ १२
तंजीवसेन आनोगव्यूतिमुक्षतं घृतेन ॥ आमाजनेभूवय
तं जुवाना श्रुतं मे मित्रावरुणा हवेमा ३ वौषट् ॥ इतियाज्या ॥
इदं मित्रावरुणाभ्यां न मम इति त्यागः ॥ स्विष्टकृति ॥ अग्नेः
प्रिया धामान्ययाण्मित्रावरुणयोः प्रिया धामान्ययाड्दे
वानामित्यादि ॥ पयस्यायाः प्राशित्रं गृह्यते ॥ भागचतु
र्धीकरणे न स्तः ॥ समस्य मार्जनं ॥ पूर्ववत्पवित्रे ॥ दक्षि
णायां हिरण्यमसीति वा ॥ स एव गारव्या प्रस्तरानुप्रहर
१२ णं ॥ व्यूहने अग्नेर्मित्रावरुणयोरुज्जि० अग्निमित्रा

वरुणौ तमपनुदंतु ॥ प्रहस्य तृणं ॥ आत्मालंभः ॥ उदकं स्पृष्ट्वा
वाजिनयागः ॥ विमुच्य वास्तुचोतेन चरति ॥ तत्राध्वर्युर्जु
ह्वामुपस्तीर्य स्थालीमुखेन बर्हिरवसिंचन् ॥ वाजिनं गृह्णा
ति प्रत्युपस्तीर्येति क्रम्य यजति स्थाने तिष्ठन् ॥ वाजिभ्यो
नुब्रू३हीत्युक्ते ॥ होता शान्नो भवंतु वाजिनो हवेषु देवता
ता मितद्रवः स्वर्काः ॥ जंभयंतोहिं वृकं रक्षांसि सने
म्यस्मद्युयवन्नमीवाः ३ ॥ इति पुरोनुवाक्यामनूच्य ॥ वा
जिनो यज ॥ होतानुध्वजानुरासीनो नवानं वषट्करोति
वाजिनस्याग्ने वीहीत्यनुवषट्करोति ॥ यथा ॥ ये यजामहे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाजिनोवाजेवाजेवतवाजिनोनो धनेषुविप्रा अमृता ऋतज्ञाः ॥ १३५
अस्यमध्वः पिबतमादयध्वंतृप्तायातपथिभिर्देवयानैः ३ वौषट्
वाजिनस्याग्नेवीहि वौषट् ॥ इतिवषट्कृत्वानुवषट्चकरोति ॥
अध्वर्युवषट्कारेनुवषट्कारेच संशेषंजुहोति ॥ यजमानः
२ वषट्कारे इदंवाजिभ्योन० अनुवषट्कारेच इदमग्नयेस्वि
ष्टकृते० अध्वर्युः हुत्वाजुहोति स्थानेउपविश्य वाजिनःशेष
एणदिग्भ्योव्याघारयन्ति ॥ दिग्भ्यः स्वाहा ॥ इत्यग्नेः पूर्वेयज
मानः स्यजतिसर्वत्र ॥ इदंदिग्भ्योनमम ॥ अध्वर्युः ॥ दक्षि
१३ णेप्रदिग्भ्यः स्वाहा ॥ इदंप्रदिग्भ्योनमम ॥ पश्चिमे ॥ आदिग्भ्यः

स्वाहा ॥ इदमादिग्भ्योनमम ॥ उत्तरे ॥ विदिग्भ्यः स्वाहा ॥ इदंविदि
ग्भ्योनमम ॥ मध्ये ॥ उद्दिग्भ्यः स्वाहा ॥ इदमुद्दिग्भ्योनमम ॥ पूर्वार्द्धे ॥
दिग्भ्यः स्वाहा ॥ इदंदिग्भ्योनमम ॥ शेषंस्रुक्स्थं होत्रध्वर्युब्रह्मा
ग्नीध्रयजमानाः ॥ हस्तेगृहीत्वा ॥ होतरुपह्वयस्व ॥ अध्वर्युउप
ह्वयस्व ॥ ब्रह्मन्नुपह्वयस्व ॥ अग्नीदुपह्वयस्व ॥ यजमानो
पह्वयस्व ॥ इत्यामंत्र्यामन्त्र्य ॥ उपहूतइतिप्रसृताः ॥ ऋतूनांत्वा
वाजिनांवाजिनंभक्षयामि ॥ इतिमंत्रेणभक्षयंति ॥ परिधिषु
हूयमानेषु अग्नीत् ॥ जुहोमित्वा ॥ स्यन्नइतिमंत्रेणसहैवा
पवेषंजुहोति ॥ अनुनिर्वापपक्षेपुनरुद्धरणं आदित्येष्टिः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अथ संवत्सरं वाऽयजेतिपक्षे॥ आधानानंतरं पौर्णमास्यां मातृपूजां ॥१४॥
श्राद्धमन्वारंभणीयां चरुं कृत्वा पुनरुद्धृत्याग्नीषोमीयाय थोक्तः॥ पु
नरुद्धृत्याग्न्यन्वाधानं॥ मासमैथुनसंकल्पः॥ शाखाछेदनादि
निधानांतः॥ सायंदोहः॥ प्रातराग्नेयेनैं द्रेणचदध्नायागः॥ पक्षे
वैमृधः॥ मासत्र्यनृतमूत्रवर्चस्नातवासांसिवर्जयेत्॥ आस
माप्तेरितिसंकल्पः॥ पुनरुद्धृत्यैं द्राग्नीय थोक्तः॥ पुनरुद्ध
त्याग्नेयस्य मैत्र्यावरुण्याः पयस्याभ्योपक्रमः॥ तत्रग्न्य
न्वाधानं॥ शाखाछेदनं॥ संनमनं॥ उपवेषान्निष्पत्तिः॥
१४॥ पवित्रबंधनं॥ दध्नाग्निहोत्रहोमः॥ वत्सापाकरणं॥ शाखया

पशुहननं॥ प्रातर्यागो यथोक्तः॥ तदनंतरं मादिस्योवा॥ एवमन्वहं ष
ष्ठ्युत्तरशततमदिनपर्यंतं॥ अथाग्नेयं प्रतिकाममाहरेदित्या
ग्नेयः काम्याविहितः॥ तस्यचोपांशुत्वं विहितं॥ उपांशुकाम्य
देवतेतितत्प्रसंगेनयत्रोपांशुत्वं तदुच्यते॥ चरणाशाखा सर्वदेव
तान्यत्रेत्यत्रकेप्यत्रदेवताग्रहणं॥ प्रधानदेवतायाएवोपांशु
त्वार्थं तेनांगेषु तत्तच्छंदानुसारेण ध्वनिः॥ तत्र॥ उपांशुयाज
स्योपांशुदेवतायाज्यापुरोनुवाक्याजुषतावीवृधतावृते
तिचोच्चैरन्यदुपांशु प्रयोगिनांचैवमावपदादत्॥ घसत्के
रदग्नभीद्वीवृधंतेतिचपरोयथामंत्रवचनरति॥ उपांश्वेवा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वदादि॥ दर्शपौर्णमासतंत्रादन्यत्र आवाहस्वाहाप्रिया धामानि १५॥
दंहलिरिस्त्र्ये॥ उच्चैरुपांशुलाया: सर्वत्रोपस्मरेदितिहौत्रोक्त:॥
आग्रयणेष्ववैश्वदेवेष्वर:॥ एककपालाग्न्यावारुणा: प्रा
जापत्य: पशुश्चरु: पुरोगश्चाप्युपांशुश्चरेव॥ सावित्राप्या
तुर्मास्येषु वैश्वदेवी पयस्या चवैश्वदेवप र्वणि॥ वायव्यं हवि:॥
शुनासीरीये॥ तन्नहवी ६ षि आधाने॥ दीक्षणीयाप्रायणी
यातिथ्यानादेवता: देवसुदेविका हवि ६ षि वायव्य: पशु:
अग्नीषोमीयश्चनैमैत्रावरुणी च अग्नावे॥ ऐन्द्र: पशु: सौत्रामण्यां
१५॥ वायवे वसुभ्य पशु: उपां ६ शूपसद: पुनराधेये उत्तमानुयाजे

मेवोक्ते॥ अन्यदुपांशु॥ यत्र च रणेश्च स्तत्र सर्वमुपांशु॥ यथा
पत्नीसंयाजेषु॥ उपांशु चरन्तीत्युक्त:॥ चातुर्मास्य पित्र्येष्टौ॥
पितृयज्ञ उपांशु॥ चरणमित्युक्त:॥ अग्निष्टोमे॥ उपांशुश्चरति
प्रागग्नीषोमीयात्॥ इति चैवमादौ सर्वमुपांशु॥ यस्मिन्मंत्राद
यो न विज्ञायते न स्वरो न व्यंजनं केवलमेवोष्ठचालनं भवति तदु
पांशु॥ इत्युपांशुधर्मा:॥ मंद्रस्वरेण विलंबितया च वस्यां सा
मिधेनी प्रैषाप्याज्यभागांते॥ कंठेन मध्यमया चेत्यते॥ द्री
र्घल्येन द्रुतया च शहांते॥ इति स्वरविकृतय:॥ अथाग्नेयं प्र
तिकाममाहरेदिति काम्याग्नेयप्रतिकामं मातृपूजानांदी
श्राद्धमन्वारंभणीयाश्च॥ तंत्र॥ अथात: काम्यप्राय श्चित्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शीनोसप्तदशसामिधेन्यो वार्त्रघ्नावाज्यभागौ विराजौ संयाज्ये इ १९
ति होत्रसूत्रोक्तो विधिः ॥ दोषप्रावृत ॥ दृष्ट्यर्थं तु उद्धरणका
ले यजमानः ॥ वृष्टिकामोस्मि तथा प्रयाजेभ्यः प्राक् अध्वर्यो
पुरोवातं च विद्युतं च मनसा ध्याय ॥ इत्यध्वर्युं ॥ अग्नीत् अ
भ्राणि मनसा ध्याय ॥ इत्यग्नीधं ॥ होतः स्तनयित्नुं च वर्षं च म
नसा ध्यायस्वेति ॥ होतारं ॥ ब्रह्मन् पुरोवातं च विद्युतं चाभ्रा
णि च स्तनयित्नुं च वर्षं च मनसा ध्याय ॥ इति ब्रह्माणं ॥ आश्रा
वयन् अध्वर्युः ॥ प्रत्याश्रावयन् अग्नीत् ॥ होता च वषट् कुर्वन् ॥
ब्रह्मा आश्रावणादियागांतं यथा ध्यायेत् ॥ अथ श्रौतिका
१९ र्मं मातृपूजाश्राद्धान्वारंभणीयापूर्वकं दर्शपौर्णमासाभ्यां

यजेतेति तदा काम्याभ्यामेव ताभ्यां नित्ययोः सिद्धिः ॥ अथ अ
न्वारंभणीयाग्नावैष्णव एकादशकपालः ॥ सरस्वत्यै चरुः
सरस्वते द्वादशकपालो दर्शपौर्णमासारंभे पष्ठौहि दक्षि
णा मिथुनौ वा ॥ इति सूत्रेण दर्शपौर्णमासारंभे विहि
ता ॥ तत्राधानानंतरं पौर्णिमायां दर्शपौर्णमासाभ्यां
यक्ष्ये गणेशपूजनं स्वस्तिवाचनं मातृपूजनं नांदीश्रा
द्धं च करिष्ये ॥ इति संकल्पयेत् त्याच पुनर्दर्शकाले की
र्तनानंतरं दर्शपौर्णमासारंभनिमित्तमन्वारंभणी
येष्ट्याहं यक्ष्ये ॥ अध्वर्युरुद्धरेति यजमानः षट्सप्त

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धोगृहीत्वा॥ तत्राग्नाविष्णू॥ एकादशकपालेन पुरोडाशेन॥ सर १८
स्वतीचरुणा॥ सरस्वतं द्वादशकपालेन पुरोडाशेनाहं यक्ष्ये॥ अ
न्यत्तु वैकल्पिकपदार्थजातमृत्विक्प्रत्ययेनावधारितं॥ विशे
षस्तु॥ चरुमेक्षणयोरुपकल्पनं॥ दक्षिणाबालगर्भिणीमिथु
नौ हैवा स्त्रीपुमांसौ गावौ॥ ग्रहणप्रोक्षणनिर्देशप्राणदा
नानुवाचनयाजनव्यूहनेषु अध्येषीय यथादेवतमूहः॥ तथा
वाहनोत्तमप्रयाजस्विष्टकृत्सूक्तवाकेषु आज्यभागस्विष्ट
कृदंतरेभीज्यानामावापरः सूक्तो यथादैवतोहः॥ होतुः
१८ एवं सर्वत्र॥ कर्णांते चरुविवेकः इदं सरस्वत्याः एकाद

शकपालान्युपधाय मध्ये चरुस्थानं कृत्वा तत्पुरतो द्वादश
कपालस्युपदध्यात्॥ पिष्टेक्षणं ते तंदुलेक्षणं मंत्रेणापा
त्याः सपवित्रायां पिष्टान्योप्य सपवित्रे चरौ तंदुलावापः
पिष्टेषुपसर्जन्यासेकोनंतरं चरुवासेकोपि संपयरिति
मंत्रेण॥ पुरोडाशयोः संयवनं॥ चरोः संयवनप्रथ
नाभिदरभिमर्षनाभिवासनाभावः॥ इदमग्नाविष्णोः इदं
सरस्वतः॥ प्रधाने अग्नाविष्णुवेयामेना अग्नाविष्णू सजो
षसेमावर्धंतुवांगिरः॥ घृस्ने वाजेभिरागतं॥ इत्यनुवाक्या॥
ये३ यजामहे अग्नाविष्णू महितद्धामप्रियं वां मिथो घृतस्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गुह्यो जुषाणः ॥ दमेदमे सुष्टुतिर्वावृधानाप्रतिवां जिह्वा घृतमु १८
च्चरण्याऽऽवौषट् ॥ इतियाज्या ॥ अथ सरस्वत्याः ॥ पावका
नः सरस्वती वाजेभिर्वाजिनीवती ॥ यज्ञं वष्टु धियावसुः ॥
इत्यनुवाक्या ॥ ये यजामहे सरस्वतीं पावीरवी कन्या चित्रा
यु: सरस्वती वीरपत्नी धियं धात् ॥ ग्नाभिरच्छिद्रं शर
दु रणं सजोषा दुराधर्षं गृणते शर्म यंसत् स्वाहा वौषट् ॥
इतियाज्या ॥ अथ सरस्वतः ॥ पिपिवांसं सरस्वत
स्तनं यो विश्वदर्शतः ॥ भक्षीमहि प्रजामिषं ॥ इत्यनु
१८ वाक्या ॥ ये यजामहे सरस्वन्तं दिव्यं सुपर्णं वायसं बृहं

तमपां गर्भं दर्शतमोषधीनाम् ॥ अभीपतो वृष्टिभिस्तर्पयंतं
सरस्वंतमवसे जोहवीमि वौषट् ॥ इतियाज्या ॥ पष्ठौहिप
क्षेगोरसीति ॥ मिथुनौ चेत्तू ॥ इमौ गावौ वो प्रतिगृह्णतां ॥ प्र
जापतेर्भागोस्यूर्जस्वंतो पयस्वंतौ प्राणापानौ मे पातं स
मानव्यानौ मे पातमुदानव्यानौ मे पातं मिथुनौ गावौस्यूर्जं म
यि धत्तमक्षितौस्थो मा मे क्षेषाथाममुत्रामुष्मिंल्लोक इह च ॥
इति विशेषः ॥ शेषं पूर्णमासवत् ॥ इयं सर्वेष्ट्या रंभे कर्त
व्या इत्यन्वारंभणीया ॥ ६ ॥ आग्रयणमैंद्राग्नमग्रपाकस्य
व्रीहीणां यवानां च वैश्वदेवश्चरुः ॥ पयसि वा प्यावाप

थिवीय एकः कपाल उद्वास्यां ताच्छादयेदाज्येनाज्यस्य वा यजे १९
त्सुराणां वा चरुः प्रथमजो गौर्दक्षिणेति सत्येण शरदिन
वै व्रीहिभिः वसंतेन वैर्य वैशाग्रयणं विहितं। तत्र प्रथमप्र
योगे। देशकालकीर्तनानंतरं। आग्रयणेष्ट्यायक्ष्ये गणेशपूज
नं स्वस्तिवाचनं मातृकापूजनं नांदिश्राद्धं च करिष्ये। तत्कृत्वा।
पुनर्देशकालकीर्तनांते आग्रयणारंभार्थमन्वारंभणी
येष्ट्यायक्ष्ये। तयेष्ट्या पुनः संकीर्त्य पौर्णमास्यां अप
वा व्रीह्याग्रयणेनाहं यक्ष्ये। यवाग्रयणेनाहं यक्ष्ये।
इति वा संकल्प्यः। तत्रैकाद[॰]पालपक्षे। अहतवासः
१९ परिधानं त्रेधा बर्हिः कुशप्रस्वः प्रस्तराणि नियमेन।

नाज्यपक्षे द्यावापृथिवीयस्य अध्वर्युस्तद्धरति। यजमानः
षट्समिधो गृहीत्वा। इंद्राग्नी द्वादशकपालेन पुरोडाशेन।
विश्वान्देवान्चरुणोपांशु द्यावापृथिवी एककपालेन
पुरोडाशेनोपांशु शरदि व्रीहिमयेन वसंते यवमयेनाहं य
क्ष्ये। आज्येन द्यावापृथिवीपक्षे। सप्तदशो वज्रः शर
दि चेत् व्रीहिभिर्यागः। वसंते चेत्। यवैः समाग्नेः पक्षः।
प्रथमजो गौर्दक्षिणा प्रथमे काले व्रतोपायनं। शेष
मध्वर्युप्रत्ययेन। अत्र विशेषः। पयः पक्षे। व्रीहीन्यवान्वा प्र
यांसि प्रणेष्यामि द्वादशकपालानि एककपालं तत्संस्

मितं वा ॥ उपसर्जनीद्वयं वोद्धरणपात्रीद्वयं वा ॥ प्रथमजो गोदक्षि २०
ण ॥ रभावे तु निष्कं स्यात्तदर्द्धं पादमेव वा ॥ निष्कं सुवर्ण
श्चत्वारः ॥ ४ ॥ २० ॥ २० ॥ १ ॥ त्रेधा संनद्धं कुशप्रस्तरं प्रस्तरेण स
ह पुनरेकधा संनद्धं बर्हिः ॥ अंतःपादनाज्यस्य चरोश्चोपक
ल्पनं नामेक्षणस्य च ॥ ग्रहणप्रोक्षणानिर्देशः प्राणदानानु
वाच्यनयाजनव्यूहने ध्रुवे षों ॥ तूथावाहनोक्तमप्रया
जस्विष्टकृतस्त्वच्चावानेषु होतुर्यथादैवतमूहः ॥ पुरा
णपक्षे ॥ प्रथमलुप्तं तद्दितीयहविरग्नेस्तन्दरिच्यावप
२० तिमुसलादानं तद्दंडी ॥ सरदमिति मंत्रेणावदधाति ॥

त्दंडीभः र्पादानं ततो मंत्रैर्हविरद्धपलि ॥ सादिकर्णांते च रविवे
कः ॥ इदं विश्वेषां देवानां ॥ पुराणपक्षेण ॥ एककपाले तपसा लप्प
स्वेस्तू हः ॥ पिष्टक्षणांते तंदुलेक्षणं मंत्रेण ॥ पात्र्यां ६ सप
वित्रायां पिष्टान्योप्य सपवित्रे चरौ तंदुलावापः ॥ पिष्टेषु पर्ज
न्यासेकांते च वासेकः ॥ पयःपक्षे प्राक्तोपसर्जनीग्रहणानं
तरं ॥ संपयअं षधीभिः समोषधयो रसेन ॥ स ६ रेवतीर्ज
गतीभिः पच्यंता ६ संमधुमतीर्मधुमतीभिः पच्यंतां ॥ इति
क्षीरोपसर्जनीग्रहणं ॥ प्राणदानांते घ्यावापृथिवीयस्यां
ताछादनं ॥ होतुः सप्तदशसामिधेन्यः ॥ समिध्यमानस
मिद्धवसावंतरेण पत्थपाजवस्योदधाति ॥ इयस्तस्सर्गप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सेनववती स्त्रिकीर्तन ॥ पृथु पाजवस्यो: स्छानेन ववृस्योद धातिति २१

होत्रं ॥ तत्र प्रवो वाजा इत्यादि शोचिष्केश स्तमीमहे । २ नवजुस्तो

ममाग्नेर्यदिव: श्येनायजी जनं ॥ वस्व: कुविद्वनातिनो ३ ॥ स्पार्हा

यस्य श्रियो दृशे रयीर्वीरवतो यथा ॥ अग्नेयज्ञस्य शोचतो ४

समिद्धो अग्न इत्यादि ॥ अथाज्यभागौ ॥ अग्नये नु ब्रूहि इत्युक्ते ॥

अदाभ्य: पुर एता विशामग्निर्मानुषीणां ॥ तूर्णी रथ: सुदान

वीं ५ ॥ इत्याग्नेयानुवाक्या ॥ अग्निं यजेत्युक्ते ॥ ये यजामहे

ग्निं जु ० ॥ इति पूर्ववत् ॥ सोमायानु ब्रूहि ॥ ७ इत्युक्ते ॥ नवस्य

सोमत्वयमासुमतीवृणीमहे ॥ सनो रास्व सहस्रिणो ॥ ७ ॥ इति

सौम्यस्यानुवाक्या ॥ सोमं यजे इत्युक्ते ॥ ये ० यजामहे सोमं जुषा०

२० पूर्ववत् ॥ अथैन्द्राग्नस्य इन्द्राग्निभ्यामनु ब्रूहि ॥ इत्युक्ते ॥ नवं

स्तोमं नव ७: हविरिन्द्राग्निभ्यां निवेदय ॥ तज्जुषेथां ७: सचेतसौ ॥ इस

नुवाक्या ॥ इन्द्राग्नी यज ॥ इत्युक्ते ॥ ये यजामहे इन्द्राग्नी शुचिं नु

स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथां ॥ उभा हि वां ७ सुहवा जो

हविमिता वाजं ७ सद्य उशंतं धेष्ठा ७ वौषट् ॥ इतियाज्या ॥ अथ

वैश्वदेवस्योपांशु ॥ विश्वेभ्यो देवेभ्य उच्चै: अनु ब्रूहि ॥ इत्युक्ते ॥

विश्वान्देवांस्तर्पयत हविषोस्य नवस्यन: ॥ स्वर्विदो हयत्रिरै उच्चै:

ॐ इत्यनुवाक्या ॥ उपांशु विश्वान् देवान् उच्चै: इत्युक्ते ॥ ये य

जामहे विश्वान्देवान्देव हि सुष्टरीमा नवेनायं यज्ञो भुवनस्य

भाग: ॥ अयं बभ्रुर्भुवनस्य गो सा विश्वेदेवा इदमघा गमिष्ठा ७

उच्चै: वौषट् ॥ इति याज्या ॥ अथ द्यावापृथिवीयस्य ॥ उपां

शु द्यावापृथिवीभ्याम् उच्चै: अनु ब्रूहि ॥ इत्युक्ते ॥ उपांशु ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इमेनुद्यावापृथिवीसमीचीयज्ञंतन्वानेपुरुरूपेससंघिया॥ २२
अप्रणीतांभुवनानिविश्वाप्रजापुष्टिरमृतंदधाते॥ उच्चैः॥
ॐआज्येनचेत्॥ घृतंमिमिक्षेघृतमस्ययोनिर्घृतेश्रि
तोघृतंम्वस्यधाम॥ अनुष्वधमावहमादयस्वस्वाहाकृतं
वृषभवक्षिहव्यं॥ उच्चैः॥ ॐ इत्यनुवाक्या॥ उपांशु॥ द्या
वापृथिवीयज॥ येयजामहे॥ उपांशु॥ इमेत्रेरूतमन्ते
दुहानेपयस्पस्तत्तमामयिलुपुष्टिं॥ इमेयज्ञंजोषमाणाव
नेनसमीचीद्यावापृथिवीघृताचीऽ उच्चैः वौषट्॥ आ
ज्येनचेत्॥ घृतवतीभुवनानामभिश्रियोर्वीपृथ्वीम
२२

धुदुघेसुपेशसा॥ उपांशु॥ द्यावापृथिवीवरुणस्यधर्म
णाविष्कभितेअजरेभूरिरेतसा॥ उच्चैः वौषट्॥ इ
तियाज्या॥ अथस्विष्टकृतः॥ अग्नयेस्विष्टकृतेनुब्रू
हि॥ इत्युक्ते॥ यजिष्ठोहव्यवाहनश्चित्रभानुघृतासु
तः॥ नवोजातोविरोचसेग्नेतन्नोमहिवचनो॥ ॐ॥ इत्यनु
वाक्या॥ अग्निंस्विष्टकृतंयज॥ येयजामहेग्निंस्विष्ट
कृतमयाडग्निरग्नेःप्रियाधामान्ययाट्सोमस्यप्रिया
धामान्ययाडिन्द्राग्न्योःप्रियाधामान्ययाट्॥ उपांशु॥ विश्वे
षांदेवानांप्रियाधामान्ययाट्द्यावापृथिव्योःप्रियाधामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्ययाट् देवानामाज्यपानां प्रिया धामानि यक्षद् ग्नेर्होतुः प्रिया २७
धामा न्ययाट्स्वाचा नियक्षत्स्व महिमानमायजतामेज्या इ
षः कृ णोतु सो अध्वरा जातवेदा जुषतां ॥ हविस्त्वमग्ने द
वताभ्यो भागदेवनवीयसे ॥ सएनाविद्वान्यक्षिनवेः स्तोमं
जुषस्वनो ०३ वौषट् ॥ इतियाज्या ॥ दक्षिणायां गौरस्य
जेमयि धेहि ॥ इति ॥ एवं वर्षासु ॥ सोम्यः श्यामाकचरुरा
रण्यस्य वैणवो वाग्नीषोमे पुनः संस्कृतार थो दक्षिणा क्षौमं
मधुपर्को वर्षाधृतेवा वासः ॥ इति सूत्रे एवं वर्षासु सोम
देवस्यः श्यामाकचरुः ग्रीष्मे वेणवश्चेत्तरत्कः तत्रेच चरुधर्मा
२७ सर्वे ॥ तत्र सोमायानुब्रूहि ॥ इत्युक्ते ॥ नवस्य सोम हविषः

पीयुषस्येह तृप्णुहि ॥ यस्ते भागाऋता वयो ०३ ॥ इत्यनुवाक्या
सोमं यजे इत्युक्ते ॥ ये यजामहे ॥ सोम नवेः स्तोमं जुषस्व नऋ
तुभिः सोमहूतयम् ॥ इदं प्रतिहर्यतारा राजस्तोमप्रतिहव्यामृ
भाया ३ वौषट् ॥ इति याज्या ॥ अन्य समानं ॥ यदाग्राग्रयणेन
एनसहे चेयं श्यामाकेष्टिस्तथाय वाग्रयणेन सहैव वैणवेष्टिः
क्रियते तदा द्यावापृथिवीय यागस्तु पूर्वं सोम्यचरुयागः ॥
अथ नवतीरष्टिं चिकीर्षितः पूर्वोक्तो विधिः ॥ इंद्राग्नी अवसा
गतं १ गीर्भिः नृमति मिंछमान २ इत्येद्राग्नस्य ॥ विश्वेदेवा
स आगत १ विश्वेदेवाः शृणुतेमं २ इति विश्वेदेवस्य ॥ महीद्यौः ॥
चक्षुषः पिता २ इति द्यावापृथिवीयस्य ॥ आप्यायस्व १ संते २

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति सौम्यस्य ॥ अस्मिन्पक्षे सप्तदशासु सामिधेनीषु ॥ शोचिष्केशस्त २८
मिमहे ॥ २९ पशुयाजा अमर्त्यो निर्हि कस्याहुतः ॥ अग्निर्यस्तस्य हव्यनो ॥
ल ॥ २ स बाधायत स्तु त्रु इत्याधियायज्ञयंतः ॥ आ च कुरग्निमूर्धयो ~~ स
मिद्धो अग्न इत्यादि ॥ प्रतिबंधवशात् दर्शपौर्णमासौ येन नारब्धौ स मा
तृ प्रजानो दिष्टोऽन्तरं दर्शपौर्णमासानि जानो द क्षिणाग्निपके चा
तुः प्राश्यं चतुर्णां पर्याप्तिमन्नं प्राशनेन भोजयेत्किंचिद्यावद्दक्षि
णा ॥ तेन तस्याग्रयणसिद्धिः ॥ यस्त्रिंशद्वर्षान्तरमग्निहोत्रमेव
जुहोति तस्याग्निहोत्राग्रयणीनो नवैः सायंप्रातरग्निहोत्रहोमः ॥
तच्छिलाया वा पयसाग्नि होत्रहोमः ॥ आग्रयणकाले ॥ संवत्सर
दीक्षादोयज्ञे आरब्धे नवान्नमाश्रितायाः गोः पयसा दीक्षितव्रतं ॥
२८ उपसद्रोहिणो कुर्वन्ति ॥ नवान्नेन पुरोडाशा ॥ संवत्सरे सत्यास्तु

सवनीयाः पुरोडाशाः एतत्सर्वमाग्रयणकाले एव ॥ इत्याग्रयणं ॥ ७
अथ क्रमप्राप्तमाधानं वक्तव्यं ॥ तत्र तावत्तदुपयोग्यरण्यादिपात्रल
क्षणमुच्यते ॥ यज्ञपार्श्वे ॥ अश्वत्थवृक्षस्य कार्या अरणी गर्भसंश्रि
ता ॥ अग्रंथिनीमं सुशाखां प्रागुदग्वा निपातयेत् ॥ अलाभे त्वशमीग
र्भादगर्भस्यापि हरेत्सुतं ॥ भवेद्यत्प्राङ्मुखी शाखा उदङ्मुख्यथवापि
च ॥ तत्परिमाणं च तत्रैव ॥ चतुर्विंशांगुला दीर्घा विस्तारेण षडंगु
ला ॥ चतुरंगुलमुत्सेधा अरणी याज्ञिकैः स्मृतेति ॥ अत्र विंशतिशा
तांगुलः पुरुषरत्निशुल्बात् ॥ ऊर्ध्वबाहोः पुरुषस्य विंशशतस्य त्रुशांता
शांगुलं ज्ञेयं ॥ अत्रोत्तरारणीरूर्ध्वभागात् अधरारणिरधोभा
गात् ॥ समाख्याबलात् ॥ अथवा दक्षिणभागादुत्तरारणिर्वामभा
गादधरारणिर्मन्थ्या ॥ स्त्रीपुरुषसंस्तवात् ॥ तत्रापि त्वग्भागः ॥ प

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ष्ठेमूर्धभागस्तु दरः सेयं ॥ तत्रैव तद्देवयथाः मंथनप्रदेशोऽग्निमान्तः ॥ १ प्रथ २५
मानि चत्वार्यंगुलानि शिरश्चक्षुः श्रोत्रमास्यं च स्यात् अन्यान्यानि चत्वार्यं
गुलानि ग्रीवांसौ २ यदन्यानि चत्वार्यंगुलानि तदुदरं ३ यान्यन्यानि
चत्वार्यंगुलानि सा श्रोणी ॥ ४ यदन्यानि चत्वार्यंगुलानि तावूरू ५
यान्यन्यानि चत्वार्यंगुलानि जंघे पादौ ६ इत्येन अरणी सर्वैरंगैः
संपूर्णा भवति ॥ यदुदरे मंथति क्षुधा यजमानः प्रमीयते ॥ यच्छ्रो
ण्यां मंथति सा देवयोनिः ॥ यदूर्वोर्मंथति सा यातुधानानां ॥ यज्जं
घायां मंथति सा पिशाचानां प्रथमे मंथने कल्पनानेतरे इति ॥ एवं
मूलादष्टांगुलेऽर्द्धचतुर्थांगुलेषु मंथने प्राप्ते पुनस्तत्रैव ॥ मूलादं
गुलमुत्सृज्य त्रीणि त्रीणि च पार्श्वयोः ॥ अंतरं देवयोनिः स्या
२५

तत्र मथ्यो हुताशनः स्मृते ॥ मूलान्नवांगुलोर्द्ध्वं प्रथमं मंथनस्थलं ॥ य
त्परिशिष्टं मूले क्षिकर्णवत्क्रोणि पंचधरा चैव पंचमी अंगुष्ठमात्रा स्यैता
नि सा पुष्टके तस्मान्नैसावकाशं ॥ मंथनस्थलं तु भयत्रैकमेव ॥ मंथन
यंत्रं च यज्ञपार्श्वे ॥ अष्टांगुलः प्रथमः स्याच्चात्र स्याद्द्वादशांगुलं ॥
ओविला द्वादशैव स्यादेतन्मंथनयंत्रकं ॥ चात्रे तु मूले मेखलो
हपट्टिकया संनद्धं अग्रे निखातलोहवृत्तकीलं मूले प्रमंथभरणा
र्थं फलं च चतुरस्रगर्त्तं ॥ ओविल्या मध्ये मध्यभागे लोहपट्टिकामाव
द्धा ॥ तथा ॥ गोवालैः शणसंमिश्रैः स्त्रिवृद्धृतमनंशुकं ॥ व्यामप्र
माणं नेत्रं स्यात्तेन मथ्यो हुताशनमिति ॥ पात्राणि सर्वाणि त्वग्बि
लिमूलदंडानि ॥ स्रुग्बिला मूलदंडा भवंति ॥ इति स्रुग्लक्षणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

के:॥तेषांप्रवृत्तिवक्ष्यन्नियमस्त्वेवैकंवत्तानिपात्राणिखादिरस्रुव २९
स्फ्यश्चपालाशीजुहूरश्वत्थउपभृद्वारणान्यहोमसंयुक्तानीति
स्वत्वात्तुसेयःचमसेनापःप्रणीतीतिस्फ्युलेश्चमसरूपंप्रणीताप
त्रंद्वादशांगुलदीर्घंचतुरंगुलैर्विस्तृतंखातंच॥यज्ञपार्श्वे॥अश्व
त्थपलाशबलोक्तंदीर्घंस्या[illegible]द्वादशांगुलं॥प्रणीपात्रंतथाकुर्यात्प्रो
क्षणीनांचपात्रकमित्युक्ततेद्वै॥अचर्मनद्धंएषिकंनलमयंवाशू
र्पमरत्निमात्रं॥स्फ्यश्चोपवेष्टोधानापिप्रणयनीयावधिव
यामपण्योकुर्यादितियज्ञपार्श्वात्॥बाहुमात्र्यःस्रुचःपाणिपा
त्रेपुष्करास्त्वग्बिलाहंसमुखप्रसेकामूलदंडाभवंति॥पाला
२९ शीजुहूःअश्वत्थउपभृत्॥वैकंकतिध्रुवाग्निहोत्रहवनीच॥

स्फ्यो॥स्याद्वृत्तिःकपालानियथोक्तचितियोग्यानि॥प्रादेशमा
त्रीशम्या॥अखंडंकृष्णाजिनं॥उलूखलमुसलेविधप्रमाणेसा
रवद्वारमये॥ससारदृषदमयेदृषदुपले॥अरत्नीमात्रीगपात्री॥
मध्यसंगृहीतासरवा॥तं॥हस्तमात्राकारउपवेषः॥आज्यस्था
लीतैजसीमाहेईवाद्वादशाकामप्रमाणा॥तीर्यगूर्ध्वसमिन्मात्रा
द्वानतिव्रहन्मुखी॥मन्मय्योदुंबरीवापिचरुस्थालीप्रचक्ष
ते॥तथोपसर्जनी॥अन्याहार्यपात्रंचतुरस्त्रंप्रोपादनं॥खनित्रा
वृतिरभ्रिररत्नीपात्रा॥व्यामप्रमाणंत्रिवृतंमौंजंजोक्त्रंस्व
प्रवरग्रंथियुक्तं॥अरत्निमात्रस्रुवांगुष्ठपर्वपृथक्पुष्करः॥
तथैववैकंकतोपि॥मकरावृत्तिबाहुमात्रंकूर्चं॥प्रादेशदीर्घं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षडंगुलायते षडंगुलखाते धन्वेऽमूलदेशे पुरोगतापात्र्यो अरत्नीमा २८
त्राणिग्रहणयजमानपत्नीहोतृषदनानि ॥ प्रादेशदीर्घषडंगुलपरि
णाहंपवमात्रतीक्ष्णाग्रं मेक्षणायमृतावदानं ॥ आदर्शाकृतिप्राशित्र
हरणेऽंगुष्ठखातेमध्ये ॥ प्रादेशदीर्घोद्व्यंगुलोत्सेधोर्ध्वचरशाका
रोलक्ष्मीनकटः ॥ षडंगुलकंकलाकारमालद्धयस्य खातषडवृत्तो ॥ पा
लाशावैकंकतकाश्मर्यवैल्वेषु पूर्व पूर्वालाभ उत्तर खादिरोदु
बरोवा ॥ परिधिवृक्षाणामिध्मः बर्हिश्च ॥ ऋत्विग्वरणार्थं कु
ण्डलवस्त्रादि ॥ पत्नीयजमानयोः क्षौमवासांसि चत्वारि ॥ द
क्षिणागावः एकोनपंचाशत् ॥ पंचविंशतिर्वा त्रयोदशवा ॥
२८ आदित्योधेनुः ॥ वरार्थंचतस्रोगावः ॥ ब्राह्मणसंतर्पणान्नाज्या

दि ॥ हिरण्यशकलचतुष्टयं ॥ उखाखात्र्कर अपरिमितं प्रणयनी
यंत्रियूनमितिवचनात् ॥ एकविंशत्यधिककाष्ठत्रियूनबद्धं प्रणय
नीयेध्मं उपयनीमदः आग्न्युद्धरणार्थमस्यात्रं चेतिसंभरत्याग्न्यगा
रयोः करणं ॥ तत्रोदग्वंशः वापरं दक्षिणद्वारं ॥ आहवनीयस्यप्राच्यां
द्वारं ॥ अत्रचगार्हपत्यदक्षिणाग्न्याहवनीयसभ्यायां कुगनि
वेदिंचमत्स्यलमंऽपकुंऽमंऽनोक्तप्रकारेण कर्तव्यानि ॥ सचप्र
कारः ॥ शोस्यो [illegible] क्रमकेषु नर्यादिकादशद्वादशाकिंशुमस्या ॥
षोडश [illegible] तुसमंत्रिधापागाग्निर्द्वितीयेपुद्गुत्करस्यात् ॥१४॥
अनेन [illegible] सार्द्धनवांगुलेज्याप्राकृस्त्रचतोस्या [illegible] स्त्र समांत
रालात् ॥ वालाग्र तिथ्यांमयुतांक चंद्रांगुलेरपाकृ [illegible] दलं
त्वथयः ॥१५॥ प्राकृप्रत्यकृत्रिकारांतरान्द्युगुलाक्षि [illegible] द्विपाशगुणे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

षडुस्तं व्रियुतद्विहस्तयमितेसार्द्धकरेंसैपुरः॥ श्रौएयोस्तोद्वि
करेपरंतनरयोर्मध्याश्चपार्श्वद्वयोतन्मध्याद्विलवेनसंग्रह
वतीयंप्राकृतिवेदिका॥३॥ वालाग्निवेदाद्वियुतेस्तुसार्द्धवि
श्वांगुलैर्वत्तमयंतुनर्यः॥ वंशस्यः करोतालूद्विकरोगुणोद्वौ
हस्तार्द्धवृद्ध्यायगपश्चगास्य॥४॥ अथकालः॥ अमा
वास्यायामग्न्याधेयंकृत्तिकारोहिण्योर्मृगशिरः फल्गु
नीषुहस्तोलाभकामस्यचित्राचक्षत्रियस्यवसंतोब्रा
ह्मणब्रह्मवर्चसकामयोर्ग्रीष्मः क्षत्रियश्रीकामयोर्व
र्षाप्रजापशुकामवैश्यरथकारमितिसूत्रे॥ निष्कामब्र
 ह्मवर्चसकामयोर्ब्राह्मणयोर्वसंतः॥ क्षत्रियस्यश्री

कामस्यान्यापिग्रीष्मः प्रजापशुकामस्यान्यस्यवैश्यरथका
रेपिरेवर्षा ऋतवः॥ कृत्तिकारोहिण्योर्मृगशिरः फाल्गु
न्यस्त्रैवर्णिकस्यहस्तोलाभकामस्यब्राह्मणस्यैव॥ अस्त
नीआदधीतयरछेत्समदीयेतेतिश्रुतेः॥ चित्राचक्षत्रिय
स्यलाभकामस्यैव॥ अमावास्यायामित्यमावास्यायामुप
क्रम्यप्रतिपद्याधानं॥ तथाप्याधानंप्रकृत्यश्रूयते॥ यदह
रेवैपनपुरस्तान्नदृश्येततदहस्यवसेदिति॥ यदहर
स्यश्वोमग्न्याधेयं स्यादिवेवाश्नीयादितिच॥ नक्षत्राधा
नपक्षेतुयस्मिन्नक्षत्रेआधानंतत्पूर्वेद्युरुपक्रमः॥
अथवोत्तरायणंसर्वेषां॥ तत्रश्रूयते॥ सयत्रोदगावर्ते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेतर्ह्यग्नी आदधीतेति॥ अथ वा॥ ऋतुनक्षत्रसंभारस्ताम्
वपनंचातुर्मास्यआपारणे धमपूर्वार्द्धान्वारभणसापराह्णी २९
नेवाकुर्यादिति सूत्रे ऋतुनक्षत्राणां दर्शणं प्रदर्शितं॥
ऋतुलिंग॥ न स्माद्येदेवैनं कदाचयज्ञउपनमेदथाग्नी
आदधीत॥ इति एवं च गुरुशुक्रास्तादिन्यूनादिकमा
सरिक्ताव्यतिपातवैधृतिपरिघपूर्वार्द्धविष्टिसंक्रमा
दिहरितेकाले आधानं॥ तत्पूर्वदिने सपत्नीको यज
मानोयथाशक्तिकृतशरीरशुद्धिः कृतप्रातर्मध्याह्न
क्रियः प्राङ्मुखउपविश्य॥ आचम्य प्राणायामत्रयं
२९ देशकालकीर्तनांते श्रौताग्नीनाधातुं गणेशपूजनस्व

स्तिवाचनमातृकापूजननांदिश्राद्धान्यहं करिष्ये॥ इति सं
कल्पकृत्वा॥ पुनर्देशकालकीर्तनांते दर्शपूर्णमासादिया
गानुष्ठानार्थमग्न्याधेयमहं करिष्ये॥ इति संकल्प्य॥ पु
नः श्रौतानग्नीनाधातुमनुः अग्न्याधेयपाकयज्ञानिष्टि
होमादिकान्मखान्सकरोति॥ वृतो यस्यस तस्य र्त्विगिहो
च्यते॥ ऋत्विजो वृणे इति संकल्प्य॥ स्वदक्षिणतउदङ्मु
खउपविष्टं ब्रह्माणं चंदनपुष्पावस्त्रालंकारैः संपूज्य अहं
श्रौताग्नीनाधास्ये तत्र मे त्वं ब्रह्मा भव॥ इति ब्रह्माणं वृ
त्वा॥ एवमेव होता भवेति होतारं॥ अध्वर्यू भवेत्यध्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्यं॥ अग्नीध्द्देवस्याग्नीध्रं च॥ वृणुयात्॥ भुवामितितवदेयुः॥ ३०
तान्केचित्॥ मृखोक्तमधुपर्केनार्चयंति॥ यजमानः॥
अत्रयेवैकल्पिकपदार्थास्ते अध्वर्युप्रत्ययेन मयावधा
रिताः॥ ततस्ते यजमानर्त्विजोग्न्यगारदेवकुर्वंति उदकुवं:
शं वापरदक्षिणपूर्वद्वारे इति॥ यजमानः पक्षेश्रौताग्न्या
धेयांगं वपनं करिष्ये॥ इतिसंकल्प्य॥ वपनं तदंगं स्नानं
च कृत्वा क्षौमे अहते वाससी वस्त्रे पत्नी च॥ सं:स्थितेध्व
र्यवेदये॥ अध्वर्युर्गार्हपत्यस्थरे॥ परिसमुह्योपलिप्या
ल्लिख्याद्धृत्य॥ इतिसम्स्त्याघाप्य॥ आधानारणिमं

३०

थनाज्जातं वा वैश्यकुलांबरीषमहानसाद्वाहृत्यांतिमंत्रमंग
लगीतवाद्यपुरःसरं यजमानपत्न्यन्वारब्धाहृतमग्निंत
त्राभ्यादधाति॥ यजमानः पत्नीचे दिवाश्नाति॥ नतत्र
कृव्यनियमः॥ रात्रौवापुनः॥ यजमानः सपत्निकः उपास्त
मयं प्राङ्मुख आवहेनीयस्यागारपुरस्तादुपविश्य॥ देवाः
पितरः पितरो देवा योहमस्मि स सन्यजे॥ यस्याहमस्मिन त
नमंतरयामि स्वमर्ईष ६ः स्वं ६ श्रांन ६ स्वं ६ः कृतमस्तु॥ अ
येति॥ पूर्वेण प्रविशन्ति यजमानः॥ आहवनीयागारद्वा
रेण दक्षिणेन पत्नी गार्हपत्यागारद्वारेण॥ पश्चादाने
रुपविशतो दक्षिणतः पत्नी च॥ ताभ्यामध्वर्युः॥ श्रो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तकर्मसाधनीभूतस्याग्नेर्योनिरूपे अरणी तत्रेयमधरा इ ७१
ममुत्तराप्रतिगृह्णीतं चेति स्पृशातः॥ इत्यश्वत्थशमीगर्
भारण्योः प्रयच्छत्यभावे गर्भस्य॥ पत्नीहस्तामधरांयज
मानउत्तरां चादायांकेनिधाय॥ उभे अपि यजमानायैवौत
तुकार्कः॥ इदं चात्र निदंनेत्रमियमोविलीमानिपात्राणि
श्रौतकर्मसाधनीभूताग्नियोनिरूपारण्योः पूजनमहं करि
ष्ये॥ इति संकल्प्य॥ चंदनाद्यैः संपूज्य नमस्कृत्य देवद्वि
जेभ्योपि हादोनिषद्यः॥ श्रौतलगी ध्यंदनादिपुज्यास्ततरा
श्रीर्दयागार्हपत्यागारेजंबन्नातिपरकीयं न वा॥ स्वा
७१ स्यविद्यमानं प्रातरग्निधेदघातु॥ संस्थितेकर्मणि

न तत्र तस्य बंधनं॥ अस्तमितेपक्षे ध्वर्युः॥ प्राग्नी वेरोहितं चर्म
ण्यानडुहे चत्वारि हविष्यपात्राणि मिमीतेल चाश्वाष्यपच्यत्य हा
स्यसेचनमध्ये गर्त्तं कृत्वा सर्पिशासी व्याम्व-थी स्तिस्त्रः स नि
धोघृतान्क्तः आदधाति तस्मिन्नग्नौ॥ समिधाग्निं दुवस्य
त घृतैर्बोधयतातिथिम्॥ आस्मिन्हव्या जुहोतन स्वाहा॥
इति प्रथमा॥ सुसमिद्धाय शोचिषे घृतं तीव्रं जुहोतन॥ अ
ग्नये जातवेदसे स्वाहा॥ इति द्वितीयाल॥ त्वा समिद्भिरङ्गि
रो घृतेन वर्द्धयामसि॥ बृहच्छोचा यविष्ठ्य स्वाहा॥ इति
तृतीया॥ अथ यजमानः॥ उप त्वाग्ने हविष्मती घृताचीर्यंतु
हर्यत॥ जुषस्व समिधो मम॥ इति जपति॥ सुसमिद्धाय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिद्वितियांवाध्वर्युः रेव समिदाधानांते जपति ॥ यजमानो गौ२
ब्रह्मा । दीनभ्यर्च्य चंदसाप्रीणामायेदमृत्विग्भ्यः संप्र
ददे इति दद्यात् ॥ चत्वार ऋत्विजः प्राश्नीतिरहौदे
न ॥ आचांतेषु ॥ अध्वर्युः राद्गुस्ते ब्रह्मौदनस्यांते ॥
यजमानो वरं ददाति ॥ वरं ददामि यूपमभ्यमिति ॥ वर
श्चावेनये भ्यो दीयते तदभिलखितं वस्त्र ॥ एवं सर्वत्र
वरदाने रात्रौ पुनर्यजमानोऽशनं चेद त्ररात्रौ गोमयपिं
डैस्तस्याग्नेः धारणं काष्ठशकलैर्वा ॥ रात्रौ सपत्निकस्य
गौ२ त्विजां च जागरणं वा ॥ आधानदिनात् ॥ नानादिवर

दानांते ॥ ब्रह्मौदनं संवत्सरं वा पुरस्तात्कुर्यात्तत्रोत्तमरा
त्रावेवाशनाजबंधनं जागरणं वाग्यमनं तत्रः सर्वो ना
दधीत ॥ ततः संवत्सरादेवं संस्कृतादग्नेः सकाशा
त् सर्वाननु गार्हपत्याहवनीयदक्षिणाग्नि सभ्यानाद
धीत ॥ अस्मिन्पक्षे अरण्याभावः ॥ तत्राधानोत्तर
गार्हपत्येनु गतेग्रामाग्निमाहृत्य चातु[illegible]ष्प्रास्य
पक्षांतस्याशनं च चतुर्णां विहरेत् ॥ होमार्थे विहृतंप
रित्यज्य पुनः स्वयोन्याः हरणं ॥ व्युष्टायामुपशमया
स्थापिताग्निं दक्षिणां वा सहृदन्वाहार्यपचनं त्येत् ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणाग्निमिमेकर्तुमिच्छस्तेदस्मिन्पक्षेदक्षिणाग्निमादधि २२
तेस्यस्मिन्कालेयमेवतत्रस्थाप्यःसदाधार्यश्चासः॥ चातुष्प्रा
श्यनेवाअस्त्रूशःकालेसर्वस्त्राच्चाध्वर्युः॥ वाचंयच्छापूर्णा
हुतेःइत्याहयजमानंप्रति॥ गार्हपत्यस्यस्थापनं॥ परिसमु
ह्योपलिख्याहृत्ययजमानान्वारब्धोभ्युक्ष्यपक्षेहिरण्यंनि
धायोषान्सिकतानिवपत्येवंलेपुशर्करःऐयमितरयोराहवनीय
दक्षिणाग्न्योःस्थानंपरिसमुहनादिशर्कराणिवपनांतैः
सभ्युक्षणांतैर्वाःसंस्कृतंकुर्यात्॥ अथाग्निमंथनं॥ तच्चा
नुदितेउदितेवा॥ उभयपक्षेप्याहवनीयोद्धरणंतूदितए
२२ व॥ अध्वर्युःअश्वमानय॥ इत्यग्नीधंब्रूयात्॥ तेनानीते

सूनिअश्वेप्राङ्मुखेपुरस्तात्स्थिते॥ तदभावेनुहि॥ आनुडुपक्षे
प्रेशभावः॥ अपरेणगार्हपत्यायतनंप्राग्ग्रीवमुत्तरलोमवृ
षाजिनमास्तीर्य॥ तत्रोत्तरारणिमितिछंदोगपरि
शिष्टात्॥ तत्राधरन्नामधरारणिंतस्यूर्वउत्तरारणिंचोद
ग्यांनिधाय॥ आयतःचत्वारअंगुलोनिम्नोरःष्यक्षुःप्रोत
मास्यैच॥ तत्तोन्यानिचत्वारिउरूः॥ अन्यानिचत्वारिजंघपा
दोच्छेत्यवयवान्संचिंत्यमूलात्दशमेअंगासच्चेपदकुंगुले
मध्येधरारण्यांमंथनंचिन्हं॥ त्वत्तोत्तरारण्याःमूलदेशाच्च
न्चितुअष्टांगुलःप्रमंथःस्यादीर्घश्चउपिस्यते॥ उत्से
धोष्टांगुलस्तस्यस्यात्॥ नपूर्वउर्ध्वंगइतियज्ञपार्श्वरतिलि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

खितमस्ति छेदोगपरिशिष्टे ॥ त्रिरुद्धरेद्यथा थनेत्रेण चात्र पत्यो २८
हुताशुकः ॥ पूर्वमभ्यसरं एयेते प्राच्यग्ने स्याद्यथा च्युतिः दृष्टां
गुलदीर्घं घ्यंगुल विस्तृतो च्चं मंथं निधास्यतदग्ने चात्र मूल
गर्ते प्रोतं घृत्वा मंथनं चिन्ते प्रमंथ मूलं निधाय च ॥ त्रागे चौ
विली मुदगग्रां यजमानो दृढं धृत्वा पत्न्युरयी पत्नी नेत्रेण
चात्रं त्रिवेष्टईत्वा मभ्राति ॥ पत्नीयजमानयोरसामर्थ्ये त
तोन्ये ऋत्विजो नेत्रास्तण भ्रमथ्यली धारयंति च ॥ अग्नौ जा
ते वरदानमध्वर्युर्वे यजमानः करोति वरं ददामिति ॥ मन
२४ सैकेरदं वस्तु दास्यामिति समापो ददाति ॥ कंचितु अष्टां
गुलः प्रमंथः स्याद्दीर्घ घ्यंगुल विस्तृतः ॥ उत्सेधो घ्यंगुल

स्तस्यत्वैशान पूर्व उर्द्धगरति ॥ यत्तपार्श्वेदतिलिखितं स्तु छंदोग
परिशिष्टे ॥ त्रिरुद्वेष्ट्याथ नेत्रेण चात्रे पत्न्याहुताशुकाः ॥ पू
र्वमथ्यं तरण्यं ते प्राच्याग्ने स्याद्यथा च्युतिः ॥ ततो भस्मपात्र
स्थ शुष्क गोमया चूर्णं निधायाग्निं संस्कुरत्यात् पुनराधानेपि भव
ति ॥ ततः सर्वानादधीते यस्मिन्पक्षेन भवति ॥ लब्धा तौभि
प्राप्तिति तत्र भिन्यास स्यजात संयोगात् ॥ उष्णासस्तु भव
त्यात्म संस्कारात् ॥ ततः अग्निं प्राणा आदधे ॥ इति मंत्रे
णाग्निमभिलभ्य उर्ध्वेभ्यासे करोति ॥ उष्णासो यजमान
संस्कारो नः पुनराधाने न भवति ॥ ततो दारभिर्ज्वल
तमध्वर्युः शातहनीयरखरे मध्यनितितु आंगिरस प्रवरमताय

जमानानां भूर्भुवः अंगिरसां त्वा देवानां व्रतपते व्रतेनादधे॥ इति ३६
संस्कृते गार्हपत्यायतने गार्हपत्यमादधाति॥ भार्गवप्रवराणां
तु यजमानानां॥ भूर्भुवः भृगूणां त्वा देवानां व्रतपते व्रतेना
दधे इति॥ तदन्येषां तु॥ भूर्भुवः आदित्यानां त्वा देवानां व्र
तपते व्रतेनादधे इति॥ क्षत्रियस्य॥ वरुणस्य त्वा व्रतपते॰
इंद्रस्य त्वा व्रतपते॰ इति राजन्यस्य॥ अभिषिक्तराजपुत्र
स्य॥ वैश्यस्य॥ मानो ग्रामण्यो व्रतपते॰ इति रथकृतः
ऋभूणां त्वा देवानां व्रतपत इति॥ पक्षे अध्वर्युः रथंतरं
गायेति॥ प्रेष्यति॥ ब्रह्मा रथंतरं गाय इति अभित्वेति ऋ
त्विवा॥ अध्वर्युः॥ अरत्निप्रमाणैकविंशत्या धकको
३५

क्षत्रियेन बद्धं प्रणयनीये धर्मस्य प्रागग्रस्य मूलं गार्हपत्ये प्र
दीप्यते सोपनीयन्मत्पात्रे निधायोद्धरति॥ अश्वं पुरस्तात्
गच्छति स्यूवा॥ तदभावे अयुवा॥ अश्वाभावेनड्वान्॥ अ
नेनुपक्षे श्वमानयति प्रेषाभावः॥ अध्वर्युराहवनीयस्थर
गच्छति॥ यजमानो धर्मं गृहीत्वानुगच्छति॥ अध्वर्युः प
क्षे वामदेव्यं गाय॥ इति प्रेष्यति॥ ब्रह्मा गायति वा कया
नश्चित्र इति ऋचे॥ अध्वर्युस्तं प्राञ्चमश्वमेवाश्वं मनुहं
वाद क्षिणपर्वपादेन संभारानधिष्ठाप्य दक्षिणपूर्वपा
देन प्राञ्चं नीत्वा प्रदक्षिणमावर्त्य प्रत्यञ्चमुखं स्थापयति॥
पक्षे बृहद्गाय॥ इति प्रेष्यति॥ ब्रह्मा गायति वा॥ अध्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मे रिध्मच्छेदनाग्निरत्नारवरस्थे मुद्रिते पदं द्विरूपस्पृश्य तृतीये २९
नोपस्पर्शनेन द्वितीयेन वा प्रथमेन या सह तत्र मुद्रिते पदे ॥ भूर्भुवः
स्वः अंगिरसां त्वा देवानां व्रतपते व्रतेनाधे ॥ भार्गवप्रवरवतां
तु भूर्भुवस्वः भृगूणां त्वेत्यादि पूर्ववत् ॥ इत्याहवनीयमादधा
ति ॥ अन्येषां तु ॥ भूर्भुवः स्वः आदित्यानां त्वा देवानां व्रतपते
व्रतेनादधे ॥ इत्यादि च पूर्ववत् ॥ पश्चाद्यजमानः पुरस्तात्परि
क्रम्य ध्मपूर्वार्धं गृहीत्वा ॥ प्राग्निर्भ्राप्पृथिवीवद्वरिम्णा ॥
तस्यास्ते पृथिवि देवयजनि पृष्ठेग्निमन्नादमन्नाद्यायादधे ॥
इति जपति ॥ इध्मं विसृज्य ॥ आयङ्गौः पृश्निरक्रमीदस
दन्मातरं पुरः ॥ पितरं च प्रयं स्वः ॥ १ ॥ अन्तश्चरति रोचनास्य
२९ प्राणादपानती ॥ व्यख्यन्महिषो दिवम् ॥ २ ॥ त्रिंशद्धाम वि

राजति वाक्पतङ्गाय धीयते ॥ प्रति वस्तोरह द्युभिः ॥ इति ति
सृभिः सार्पराज्ञीभिरुपतिष्ठते वा ॥ अध्वर्युर्गार्हपत्याद्धारुभिर्ज्व
लंतमुद्धृत्य दक्षिणाग्निमादधातीति धौ ॥ दक्षिणाग्निं वा सहंह
रेदित्यस्मिन्पक्षे तमेवादधाति सनु नित्यधार्यः ॥ सभ्यस्व
रे परिसमूहनादिसंस्कारान्कृत्वा ॥ सभ्यं च निर्मथ्या
भ्यादधातीति धौ ॥ यजमानः गां दीव्यध्वं ॥ इत्याह ॥ अस्ति
जस्तु अग्न्युत्तरतो धोमुखकांस्यपात्रोपरि पंचकपर्दकानो
पाप्य समेन जयामि विषमेन यजसे इत्यक्षः प्रक्षिपति ॥
पूतोले यजमानो गां ददातीति सभ्यः ॥ इदं पूतं सभ्यागा ॥
अतः पुनराधेयेन भवति ॥ अतः प्रभृति सभ्यस्य धारणं ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रस्थानेसर्वदाकर्त्तव्येतत्तोध्वर्युः॥ पक्षेद्वयेनवावरेत्तीययज्ञाय २८
ज्ञियानिगाय॥ इतिप्रेष्यति॥ ब्रह्मागायतिवा॥ प्रदक्षिणमग्नी
न्परीस्तोदकमुत्सृजत्यम्बे॥ अध्वर्युः॥ पूर्णाहुतिंजुहोति॥ गार्ह
पत्योत्तरतआज्यस्थाल्यांनिरुप्याज्यंगार्हपत्येधिश्रित्य॥ द
र्भैः खादिरंस्रुवंवैकंकतींचस्रुचंसंमृज्याग्नौतास्येसाग्राभ्यांकु
शाभ्यांसुत्सुयावेक्ष्यस्रुवेणद्वादशचतुरोवागृहीत्वास्रुचंसं
पूर्यास्कंदयन्नुपरिसमिधंधारयन्नाहवनीयंगत्वासमिध
माधायोपविश्यदक्षिणंजान्वाच्यंयजमानान्वारब्धः॥
स्वाहा॥ इतिमंत्रेणजुहोति॥ यजमानः इदंप्रजापतये
२८ नमम॥ इदमग्नयेनमम॥ इतिवा॥ वरंददामि इतिवाग्वि

सर्जनंयजमानस्यपत्न्याश्च॥ गोवाहिरण्यंवाध्वर्यवेददाति॥
अध्वर्युः॥ तत्र्छिमग्निहोत्रंजुहोति॥ यथा॥ अंतरेणाप
राग्नीगत्वाप्रदक्षिमाहवनीयंपरीत्योपविशतियजमानःप
त्नीचयथादेशमपआचामति॥ तूष्णीं॥ वाचंयच्छतिच॥ अ
ध्वर्युः॥ अपरेणाहवनीयंकूर्चंनिदधातिकुशान्वा॥ परि
स्तरणंसर्वेषामाहवनीयंगार्हपत्यदक्षिणाग्नीनांततःप्रथ
मंगार्हपत्यंपर्युक्ष्यततोदक्षिणाग्निंपर्युक्ष्यगार्हपत्याद
हवनीयंयावत्संततोदधारांनीत्वाहवनीयंपर्युक्ष्यपूर्वेणा
हवनीयंहोमद्रव्यस्याहरणंगार्हपत्योकस्थापनंनवैक
वत्तंस्रुवंस्रुचंप्रतप्यपाणिनासंमार्ष्टिपुनःप्रतप्य॥ उन्न

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यामि॥ इत्याह॥ यजमानस्तिष्ठन्॥ मनसेध॥ ॐ मुन्नय॥ हस्तंप्रद ३८
र्शयेत्॥ अध्वर्युर्वामहस्तस्रुचिचरतुरः स्रुवानुन्नयति॥ जंमद
ग्निप्रवरवलोपच॥ प्रक्षाल्यापरिशिनष्टि॥ स्रुग्दंडोपरि अंगुल्यं
तरितांसमिधंधारयन्वाग्निंगार्हपत्योपरिनीचैः॥ ऊर्ध्वामु
खमात्रेधारयन्नाहवनीयंप्रतिगच्छन् मध्येनाभिमात्रेनिगृ
ह्यपुनरुद्धृत्याहवनीयंगत्वोपविश्यदक्षिणंजान्वाच्याहव
नीयेसमिधमाधायप्रदीप्तामभिभूयिष्ठं दीर्घाज्ज्वहोत्य
ल्पयजमानोमनसा॥ इदमग्नयेनमम॥ शेषपात्रात्तरेखस्था
पुनःश्रुत्तुरः स्रुवानुन्नयोपरिसमिधंधारयन्वाग्नीम
३८ ध्यधीगार्हपत्यादाहवनीयं हरतिमुखमात्रेधारयन्म

ध्येनिगृह्योद्धृत्योपविश्यसमिधमाधायदक्षिणंजान्वाच्यस्व
ल्पंजुहोति॥ यजमानोमनसा॥ इदंसूर्यायनमम॥ अध्वर्युः॥
पात्रात्तरस्थशेषस्रुचिसमासिच्यस्रुचंकूर्चेनिधाय॥ गार्ह
पत्यमवेक्षतेहोष्यन्नस्मिन्॥ स्रुचमादायभूयिष्ठं स्रुचि
परिशोषयन् प्रजापतिंध्यायन् पूर्वाहुतेरुदगसंसृष्टोत्तरा
हुतिंभूयसींजुहुयात्॥ यजमानोमनसा॥ इदंप्रजापतये
नमम॥ अध्वर्युः भूयिष्ठं स्रुचिद्विःप्रकंप्यनिदधातिकूर्चे॥
गार्हपत्येतिष्ठन्॥ समिधमाधायोपविश्य दक्षिणंजान्वा
च्यस्रुवेणगार्हपत्यदक्षिणाग्नेनोचोत्तरतस्तिष्ठन्नेकैकास
मिधमाधायोपविश्यतंत्रेणद्वेद्वेआहुतीजुहोति॥ यजमानो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मनसा त्यजति॥ स्रुक्स्रुवशेषं बर्हिर्निक्रम्यानामिकया प्रादुया
चम्यरनामिकया प्रादुयाचक्रोषं स्रुक्स्रुपात्रांतर हस्तेवाप्रा
श्य पात्रे हस्तेवासधुनि कौष्योचम्याहवनीयस्य पश्चादुपविश्य
स्रुच मन्त्रैः संपूर्याहवनीयस्योत्तरतउत्सिंचति॥ द्वितीयांसं
पूर्योत्सिंचति तृतीयां संपूर्येशान्यामुदक्षेति उच्ये॥ चतुर्थीं
संपूर्यकूर्चस्थपात्रे निषिंचति प्राकुस्थं वेसं स्रुक्स्रुवमाहव
नीयेसहैवप्रतप्यनिदधाति॥ गार्हपत्ये दक्षिणाग्नौ आहव
नीये च समिदाधानं॥ पर्युक्षणं च॥ इति पूर्णाहुत्यंतमग्न्या
धानं॥ इष्ट्यंतमपि भवति॥ तथा च सूत्रं॥ द्वादशाहोलेत
न्नहविःषि निर्वपति मासे द्वितीये तृतीये षण्मास्ये संव

सरे स घोवान श्राग्नये पवमानाय प्रथमाग्नये पावकायाग्नये शु
चये च द्वितीयादित्ये चरुस्तृतीयाग्नेय एव वा पुरस्तादादित्य
स्य षट् दक्षिणाः प्रतिविज्य ददाति द्वादशं च तु विः इति वा
भूयसी भ्य यथाश्रद्धं धेनुरादित्यस्येति॥ निर्वापि पश्चात न्नहवि
र्भिरहंयक्ष्ये॥ तत्र पवमानप्रचाहं यक्ष्ये॥ तत्रोपांशु सर्वं॥ अग्निं
पवमानमष्टाकपालेन पुरोडाशेनाहं यक्ष्ये॥ तएवाग्नयः॥ अ
न्यन्वाधाने॥ प्रस्तरणाभावः॥ गृहणं प्रोक्षण प्राणदाना
नुयाचनयाजनव्यूहलेषु आध्वर्यवे॥ होत्रे च॥ आवाहनोत्त
मप्रयाजस्विष्टकृत्याग स्रुचाः पाकेषु॥ एवं अग्निं पवमान
पदं यथा विभक्ति ऊह्यं॥ एकत्वान्निर्देशाभावश्चात्र प्रावा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ज्यभागौ॥ उपांशु॥ अग्नयेपवमानायानुब्रूहि॥ इत्युक्ते॥ होताउपांशु॥ ८
अग्नऽआयूंषिपवस ऽ आसुवोर्ज्जमिषंचनः॥ आरेबाधस्वदुछुना
॥ उच्चैः॥ ॐ इत्यनुवाक्या॥ अध्वर्युणा उपांशु॥ अग्निंपवमानं॥
उच्चैः यजइत्युक्ते॥ ये ३ यजामहे॥ उपांशु॥ अग्नेपवस्वस्वपाऽअस्मे
वर्च्चः सुवीर्यं॥ दधद्रयिम्मयिपोषां ३ उच्चैः वौ ३ षट्॥ इतियाज्या॥
अध्वर्युणा॥ उपांशु॥ अग्नयेस्विष्टकृते॥ उच्चैः अनुब्रूहि॥ इत्यु
क्ते॥ होतोपांशु॥ अग्निमीळेपुरोहितंयज्ञस्यदेवमृत्विजं॥ होतार
ऽरत्नधातमं॥ उच्चैः॥ ॐ इत्यनुवाक्या॥ अध्वर्युणा उपांशु॥ अ
ग्निंस्विष्टकृतं॥ उच्चैः॥ यज॥ इत्युक्तेहोतोच्चैः॥ ये ३ यजामहे॥
अथोपांशु॥ अग्निंस्विष्टकृतमयाडग्निरग्नेः प्रियाधामानियाडग्निः स्विष्टकृतं नि
गदांते॥ तत्वामज्मेपुवाजिनंतन्वानाअग्नेअध्वरं॥ वह्निंहोता
रमीळते उच्चैः॥ वौषट्॥ इतियाज्या॥ दक्षिणामंत्रोगोरसि॥

८

इति॥ षट्पक्षेतिसश्चत्वारोभूयस्यः द्वादशपक्षेषट्सप्तभूयस्यः
चतुर्विंशतिपक्षेद्वादशत्रयोदशभूयस्यः॥ यथाभागंप्रतिगृह्णता
मिति॥ अथद्वितीयहविः॥ तत्रपावकशुचिभ्यांयक्ष्ये॥ त
त्राग्निंपावकमग्निंशुचिंचाष्टाकपालेनपुरोडाशेनाहंयक्ष्ये॥
षोडशकपालानि॥ ग्रहणप्रोक्षणनिर्देशप्राणदानानुवाचनया
चनव्यूहनेध्मध्वर्यौः॥ होताप्याधाहनोत्तमप्रयाजस्विष्टकृत्सुक्त
वाकेषुयथादेवतमूहः॥ वधन्वंतावाज्यभागौ॥ अग्नेपावकरो
चिषामंद्रयादेवजिह्वया॥ आदेवान्वक्षियक्षिच॥ उच्चैः॥ ॐ
इतिपुरोनुवाक्याप्रथमस्य॥ सनः पावकदीदिवोग्नेदेवाँ२ऽइहावह॥
उपयज्ञंहविश्चनः॥ उच्चैः॥ ३ वौ ३ षट्॥ इतियाज्या॥ अथ
द्वितीयस्यहविषः॥ अग्निः शुचिव्रततमः शुचिर्विप्रः शुचिः

१९

कवि:॥ शुचिविरोचतऽआहुतः॥ उच्चैः॥ इतिपुरोनुवाक्या॥ अथयाज्या॥
उदानेषु चयस्त वसुक्राभासंतर तरे॥ तवज्योतीं॰ षि॰ यः॥ वौ॰ षट्॥
अग्निस्स्वो संयाज्यायथा॥ अथस्विष्टकृ तिपुरोनुवाक्या॥ अग्निना
ग्निः समिध्यते कवि गृहपतिर्युवा॥ हव्यवाड्जुह्वास्य॰ उच्चैः॰ ॐ॰
अथयाज्या॥ तत्र॥ य॰ यजामहे॥ अग्निस्स्विष्टकृत मयाडिस्रादिह
यि रिसं तनिगदांते त्वं॰ ह्यग्ने अग्निना विप्रोविप्रेण संत्सता॥ स
खासख्यासमिध्यंसे॰ उच्चैः॥ वौ॰ षट्॥ दक्षिणाप्रथमेषित
ता॥ तृतीयायां॥ [redacted] अदितिं चरुणायक्ष्ये॥ तत्र सप्तदशाव
न्त्रः॥ पात्रासादने॥ कपालोपवेशोद्धरणपात्र भावः॥ चरुसु पक
ल्पमेक्षणंच॥ ग्रहणप्रो क्षणप्राणदानानुधावनयाजन व्यूहने
षध्येयो॥ इदितपदं यथाविभक्ति॥ होतुरष्यावाहनोक्तमत्र

१९

याज स्विष्टकृत्सुक्तवाके षु॥ पेषणसंयवणनिदेशाग्रश्चनाभिम
र्शनाभिवासनो नोपात्र्यंगुलिं॰ प्रक्षालननिनयनयोरप्यभावः॥
कएणं तेमंत्रेण ईक्षण सपवित्रे चरौ तंडुला नावा उप सर्जन्या
नयजं च मंत्रेण॥ होता सामिधेनीषु स मिध्यमाने समिध्य
वस्यो पंतरेण पशुयाज॥ वसौ दधाति॥ यथा॥ शोचिष्केश
स्तमीमहे॥॰॥ पशुपाया अमर्त्यो घृत निर्णिक्स्वाहुतः॥
अग्निर्यज्ञस्य हव्यवाे॰ तं॰ सबाधो यतस्रुच इत्था धिया
यज्ञवेतः॥ आचक्रुरग्निमूतये॰॥॰ समिद्धो॰ अग्न र
स्यादि॥ चित न्वंता वाज्यभागौ॥ त्वमग्ने सप्रथा अ सिजुष्टो
होता वरेण्यः॥ त्वया यज्ञं वितन्वते॥ उच्चैः॥ ॐ इत्याग्ने

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

४२

यस्य पुरोनुवाक्या ॥ सोमयास्ते मयोभुव ऊतयः सन्ति दाशुषे ॥ ताभि
र्नोविता भव ॥ उच्चैः ॥ ॐ इति सौम्यस्य ॥ अथ प्रधानस्य पुरोनु
वाक्या ॥ सुत्रामाणं पृथिवीं द्यामनेहसं सुशर्म्माणमदितिं सु
प्रणीतिं ॥ दैवीं नावं स्वरित्रामनागसमस्रवन्तीमारुहेमा स्व
स्तये ॥ उच्चैः ॥ ॐ ॥ अथ याज्या ॥ महीमूषु मातरं सुव्रता
नामृतस्य पत्नीमवसे हुवेम ॥ तुविक्षत्रामजरन्तीमुरूची
सुशर्म्माणमदितिं सुप्रणीतिं ॥ उच्चैः ॥ वौ३षट् ॥ इति
याज्या ॥ स्विष्टकृति विराजौ संयाज्ये ॥ प्रेद्धो३ अग्न इति ॥
धेनुर्दक्षिणा ॥ इति तृतीयादित्येष्टिः ॥ अथ वा आदित्ये
ष्टेः प्रागाग्नेयः पुरोडाशः स्यात् तस्यैतदुपांशु ॥ दित्येष्टिरि

४२

ती ष्टिद्वयमेव ॥ तत्र आग्नेयेष्ट्याहं यक्ष्ये ॥ तत्राग्निमष्टाकपा
लेन पुरोडाशेनाहं यक्ष्ये ॥ तत्र त्वामग्ने पुष्करादध्यथर्वा निरमं
थत ॥ मूर्ध्नो विश्वस्य वाघतः ॥ ॐ इति पुरोनुवाक्या ॥ अयमग्निः सहस्रिणो वाजस्य शतिनस्पतिः ॥ मूर्धा कवी रयीणां ॥ ॐ
वौषट् ॥ इति याज्या ॥ स्विष्टकृति ॥ अग्निं दूतं पुरोदधे हव्य
वाहमुपब्रुवे ॥ देवाँ२ आसादयादिह ॥ ॐ ॥ इति पुरोनुवाक्या ॥
याज्यायां तु ॥ ये३ यजामहेग्निं स्विष्टकृतमयाळग्निरिह
विरिष्यं तु निगदान्ते ॥ अग्नि सोमेन बोधय समिधानो
अमर्त्यं ॥ हव्या देवेषु नो दधा३ वौ३षट् ॥ इति शेषमावृतं ॥
अस्मिन्नपक्षे षडू वा कृद इवाचलुर्विः ॥ इति वा गावो [illegible] हवे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देव्यः तथा सप्तवा त्रयोदश वा पंचविंशतिर्वा भस्त्रस्योप्यत्रैव ॥ ४३
पूर्णकुंभं तदाधानपक्षे नैव देयाः ॥ अथाहिताग्नेर्नियमाः ॥ अ
नृतवदनं ॥ अतिथिप्रत्याख्यानं ॥ दुर्गंधिकाष्ठज्वालनं ॥ ग
र्तकूपकोतिकुव दुष्कादिफलं ॥ होमार्थमुकुले ग्नो अभ्याग
तायोदकदानं च वर्जयेत् ॥ एतन्यतमाचारे अध्वर्यवे प्राय
श्चित्तं ॥ अनृतातिथ्यपनोदे च स्मार्त्तमपि ॥ एतेषां याज्ञि
कं वर्जं ॥ अथ ॥ ब्रह्मचार्य [illegible] धारि [illegible] होम्याग्निमुप
शायी द्वादशरात्रं पक्षात्रं त्रिरात्रमेतत ॥ ततः [illegible] तदाग्न्या
धेयकर्मांगतया विहिताष्टोत्तरशतब्राह्मणतर्पणं करिष्ये ॥
४३ इति संकल्प्याष्टोत्तरशतं तर्पयेत् ॥ अथाग्न्याधेयकर्मो
पपातनिमित्तप्रायश्चित्ते विशेषस्य विधानाभावात्सर्वत्रा

नादिष्टप्रायश्चित्तं ॥ अत्र यजमानः कर्मोपपातनिमित्तमनादिष्टप्राय
श्चित्तं करिष्ये ॥ इति संकल्प्य ॥ ब्रह्मा प्रायश्चित्तं जुहोति ॥ यथा ॥ नि
रूप्याज्यं गार्हपत्येऽधिश्रित्य स्रुवं स्रुचं च संमृज्योद्वास्योत्पूय आवे
क्ष्य चतुर्गृहीत्वा आग्वेदिककर्मशेषे गार्हपत्ये परिस्तीर्य स
मिधमाधाय ॥ जुहोति [illegible] गृहीतं ॥ त्वन्नः १ सत्वन्नः २ अयाश्चा
ग्नेऽयते वालं ४ उदुत्तमं ५ ॥ इति सर्वप्रायश्चित्तं जुहोति ॥ यजु
र्वेदिककर्मशेषे चेद्धवमेव चतुर्गृहीतं दक्षिणाग्नौ परिस्तरण
समिदाधानपूर्वकं ॥ भूर्भुवः स्वाहा ॥ इति जुहोति ॥ यजमानः
इदं वायवे न मम ॥ इति त्यजति ॥ पूर्ववदाहवनीये त्वंनस्त्या
दिपंचभिः ॥ सामवेदिककर्मशेषे पूर्ववत्संस्कृतमाज्यं चतुर्गृ
हीतं परिस्तरणसमिदाधानपूर्वकमाहवनीये ॥ स्वः स्वाहा ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति जुहोति ॥ यजमानः इदं स्वर्ग्यायनमम ॥ चन्द्र इत्यादि पञ्चापि तत्रैव । ४४
एषां त्यागः प्रसिद्ध एव ॥ ततो ऽन्याधेयप्रयोगे यत्र धर्मिणो नाश
स्तत्र धर्मिणएवावृत्तिः ॥ यत्र तु धर्ममात्रं नष्टं तत्र तद्धर्ममात्रस्या
वृत्तिः कर्तव्या ॥ तत्र याज्ञिकसंप्रदायोपनिबद्धपदार्थपरिमाण
१२ व लिख्यते ॥ अग्न्याहरणादिस्थापनांतः प्रथमः १ परिसम
हनादिपदांतो द्वितीयः २ उद्वासनादिजपांतस्तृतीयः ३ भोजना
दिवरदानांतश्चतुर्थः ४ ॥ धारणमुपवासः पंचमः ५ परिसम
हनादिशर्करांतः षष्ठः ६ ॥ एवमितरयोरपि सप्तमाष्टमौ ॥ ७ । ८ ।
४४ अभ्याधानादिवरदानांतो नवमः ९ अभिध्यासो ध्यासो दशमः १०

दारुभिर्ज्वलनादिरथंतरगानांत एकादशः ११ इध्मधारणादि वाम
देव्यगानांतो द्वादशः १२ अथ पुनराधेयं ॥ तच्च ॥ पुनराधेयमाधानाप्र
तिष्ठातस्य राज्ययशः कामस्याग्निस्ते आधानानंतरं संवत्सराद्वर्षीग
वमानवित्तादिहान्या अप्रतिष्ठितो भवति तस्य वाराज्यकामस्य य
शः कामस्य च ॥ त्रिरात्रावरमग्निरुद्धस्यस पौवोध्वस्योत्सृज्य ॥
सभ्यं विना ॥ पुनर्वस्वोर्वा पुनराधेयं ॥ वर्षर्तौ मध्यंदिने वा ॥ तत्र
देशकालकीर्तनानंतरं ॥ एतन्निमित्तं पुनराधेयमहं करिष्ये ॥
तत्रमेत्वपि स्थितिरूचरणं ॥ नाग्न्यागारकरणं ॥ वपनं वा ॥ क्षौ
माहतपरिधानं ॥ गार्हपत्ये संस्कारपूर्वकं निर्मथ्याभ्यादधाति
वैश्यकुलाद्वा री समहाननसाद्वा ॥ देवाः पितर इति जपः पूर्वद्वार
यजमानस्य प्रवेशः दक्षिणद्वारा पत्न्याः ॥ पश्चाद्दारेणेर पविशति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणतः पत्नी॥ अरणीप्रदानाभावः गार्हपत्यागारे जंबध्यातिवा॥ प २५
श्रोक्तेत्याहुश्राश्यंवा॥ व्युष्टायामुपशमयाग्निं॥ वाचंयच्छेति प्रैषः॥
गार्हपत्याद्यायतनसंस्कारः पक्षे संभारः॥ सद्यपक्षे संभारेभ्यः प्रा
कृ श्रोतेल्लिखनं तेभ्रीव्यपूर्व पूर्मर्कपलाशयोः द्वौ किकाग्निप
धं गार्हपत्यस्यस्थानेनिदधाति॥ एवमाहवनीयस्ययावमपूर्वं प
निदधाति॥ ततोन्वारब्धे श्रोताभ्युक्षणादिशार्करांतं॥ सभ्यस्य
विद्यमानत्वान्नतत्रसंस्कारः॥ अश्वमानयेति प्रैषः॥ मंथने॥
जातेवरदानं॥ अभिश्वासोमंत्रेण॥ नोध्वासः॥ कुत्रोज्वलतो गार्ह
पत्यस्यस्थापनं मंत्रेण॥ सामगानंवा॥ कुत्रोरेवाहवनीयस्योद्ध
रणं॥ अश्वः पुरस्तात्स्थंछलि॥ यजमानोधूमं॥ फलनुगच्छति॥
२५ संभाराधिष्ठापनाद्याहवनीयाधानं मंत्रेण॥ पक्षेरश्वमपूर्वाद्धे

न्वारंभणसार्पराज्ञ्यः॥ दक्षिणाग्निस्थापनं॥ सभ्यस्यमंथनस्थाप
नेनस्थः नगांदीव्यध्वमितिलि॥ नघ्नंतं॥ परीत्याश्वंस्योत्सर्गः॥ पूर्णा
हुतिः॥ तूष्णीमग्निहोत्रहोमः॥ इतिथथोक्तमाधानवन्मंत्रवेदू॥
तनूरुचिबांस्थाने आग्नेयः पंचकपाल॥ ततोन्नेमानुयाजवर्जं
सर्वमुपांशु॥ लत्र॥ अग्नयेजुष्टंगृह्णामीत्यादिप्रवृत्तिवत्॥
एकत्वादनिर्दिष्टः॥ होतुः पंचदशसामिधेन्यः॥ आवाहने॥ अ
ग्निमग्नेऽआवह॥ अग्निंपवमानमावह॥ अग्निमिंदुमंतमिति
वा॥ अग्निमावह॥ देवां इत्यादि॥ प्रथमेप्रयाजे॥ अध्वर्युः॥
आग्नीनूयज॥ होता॥ ये यजामहे॥ ग्नीनग्न आज्यस्यव्यंतु॥
वौ ३ षट्॥ यजमानः इदमग्निभ्योनमम॥ द्वितीयादिषु अध्व
र्युः॥ यजेत्येव॥ होता द्वितीये॥ ये यजामहे ग्नीमाग्निना

ज्यस्यव्यंतू ३ वौ ३ षट् ॥ यजमानः इदमग्निभ्यो न मम ॥ चतुर्थे ॥ ८६
ये ३ यजामहे ग्निमग्निराज्यवेतू ३ वौ ३ षट् ॥ ग्नयेद्रुमते वा ॥ यज
मानः ॥ इदमग्नये न मम ॥ पंचमे ॥ ये ३ यजामहे स्वाहाग्निं स्वा
हाग्निर्मिंद्रुमंतः वा पवमानं स्वाहाग्निं स्वाहाग्नीनाज्यपा
ञ्जुषाणो अग्निराज्यवेतू ३ वौ ३ षट् ॥ यजमानः ॥ इदमग्नये ऽ
अग्नयेपवमानायाग्नयेद्रुमते वा अग्नये ग्निभ्य आज्यपेभ्यो
ग्नये स्विष्टकृते च न मम ॥ अथाज्यभागौ ॥ प्रथमे ध्वर्युः ॥
अग्नयेनुब्रू ३ हि ॥ अग्निं स्तोमेन बोधय समिधानो ऽम
र्त्यं मू ॥ हव्या देवेषु नो दधत् ॥ उच्चैः ॥ ओं अध्वर्युः ॥ यज ॥ हो
८६ ता ॥ ये यजामहे ग्निं जुषाणो अग्निराज्यस्य वेतु ३ वौ ३ षट् ॥ द्विती

ये ध्वर्युः ॥ अग्नयेपवमानायानुब्रूहि ॥ होता ॥ अग्न ऽ आयूंषि पवस
आ सुवोर्जमिषं च नः ॥ आरे बाधस्व दुच्छुना ॥ उच्चैः ॥ ओं अध्वर्युः ॥
अग्निं पवमानं यज ॥ होता ॥ ये ३ यजामहे ग्निं पवमानं जुषाणो ग्निः प
वमान आज्यस्य वेतू ३ वौ ३ षट् ॥ यजमानः ॥ इदमग्नये पवमानाय न
मम ॥ अथवाध्वर्युः ॥ अग्नये द्रुमतेनुब्रूहि ॥ होता ॥ पघ पुरुवाणि
नेग्न ऽ इत्थेतरा गिरः ॥ एभिर्वर्धास गरन्दुभिः ॥ उच्चैः ॥ ओं अध्वर्युः ॥
अग्निमिंद्रुमंतं यज ॥ होता ॥ ये ३ यजामहे ग्निमिंद्रुमंतं जुषाणो अग्नि
रिंद्रुमानाज्यस्य वेतू वौ ३ षट् ॥ यजमानः ॥ इदमग्नय इंद्रुमते न म
म ॥ अथ प्रधानस्य ध्वर्युः ॥ अग्नयेनुब्रूहि ॥ होता ॥ अग्निन्नम
न्ये यो वसुर स्तंयं यंति धेनवः ॥ अस्तमर्वन्त ऽ आशवोस्तंनि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

साक्षो घाजिनऽइषं स्तोतृभ्य ऽआभर॥ उच्चैः॥ ॐ अध्वर्युः॥ अ
ग्निर्यज॥ होता॥ ये३ यजामहे ग्निं सो ऽअग्निर्यो वसुं गृणे सं जमा
यंति धेनवः॥ समर्वन्तो रघुद्रुवः सं सुजातासः सूरय ऽइषं
स्तोतृभ्य ऽआभर॥ ३ वौ३ षट्॥ यजमानः इदमग्नये न मम॥
अध्वर्युः॥ अग्नये स्विष्टकृतेऽनुब्रूहि॥ होता॥ अग्ने तमद्या
श्वं न स्तोमैः क्रतुं न भद्रं हृदिस्पृशम्॥ ऋध्यामा त ऽओं
हैः॥ ॐ उच्चैः॥ ॐ अध्वर्युः॥ अग्निं स्विष्टकृतं यज॥ हो
ता॥ ये३ यजामहे ग्निं स्विष्टकृतम् अग्निरग्नेः प्रिया धामा
न्ययाडग्नेः पवमानस्य रं द्रुमतः वा प्रिया धामान्ययाडग्नेः प्रि
या धामान्ययाडग्नीनाज्यपानां प्रि॰ विं हेरधाद्यग्ने श्लोकृतो भ

द्रस्य दक्षस्य साधोः॥ रथीर्ऋतस्य बृहतो बभूथ॥ ३ वौ३ षट्॥ दक्षि
णा या हिरण्यमसीति॥ वागोरसीति॥ अनुयाजेषु॥ अध्वर्युः॥ प्र
थमे॥ अग्नीत्॥ यज॥ होता॥ अग्ने वसुवने वसु धेयस्य वेतु वौ३
षट्॥ १॥ द्वितीये॥ अग्नाउ वसुवने वसु धेयस्य वेतु ३ वौ३ ॐ
तृतीये उच्चैः॥ देवो ऽअग्निः स्विष्टकृदित्यादि॥ यजमानस्य॥
इदमग्निभ्यो न मम॥ इति त्याग सर्वेपि॥ सूक्तवाके॥ अग्निरिदं
हविः॰ अग्निं पवमानं द्रुमन्तान्वावृधं हविः॰ अग्निरिदं हविः॰
अग्नय आज्यपा आज्यमजुषं॰ अग्निर्होत्रेणेत्यादि प्रकृतिव
त्॥ एवमेव होमार्थं दर्शपौर्णमासार्थं वोद्धृत्य तयोरुभयोर
नुगतयोर्युगपज्ज्ञानानन्तरमुद्यत्स्तमये वाजाते स धस्काल

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कं पु [illegible] नराधेयं कर्तव्यं तदास्मिन्नेव विहारे होमो वृद्धिः॥ अग्न्यन्तच
र्यादयो नियमा आस्य कर्त्तव्याः॥ इति सप्तर्षिनरहरिभट्टदेवज्ञ
विरचिते श्रौतनृसिंहे पुनराधेयं॥ ५९॥ ५९॥ ५९॥ ५९॥ ५९॥
अथ सायमाहुत्या ९ हुतायां यजमानो ग्नीउपं तिष्ठते॥ वात्स
प्रेणान्वेति सूत्रे पापाक्षिकं वात्सप्रोपस्थानं विहितं तदपि
गोपक्षे एव॥ तदुच्यते॥ सायं होमे अंत्य समिदाधानोत्तरं
उपप्रयंत ३ त्यादि अध्ययेन॥ २ क्षासिदायुषेरस्वेलं षष्ठिं शतिक
ठिकात्मकं वात्सप्रोपस्थानं॥ यथा॥ आहवनीयसमीपे ति
ष्ठन्॥ उपप्रयंतो ६ अध्वरं इति त्रिवारं॥ अग्निर्मूर्द्धा दिव ३
भावा ७ अयंते ॥ अयमिह ५ एताः स ३ वृत्त॥ अस्य स्तोमम्॥ ६ इति प
२८

२८ त्रिवारं॥ तनूपा ६ अग्ने ७ इन्धानास्त्वे स्यादि अदाभ्यमित्यंतं सवृत्तम्॥
चित्रावसो स्वस्ति ते पारमशीय॥ ९॥ इत्येतावत्त्रिवारं॥ अथ तत्रैवोप
विश्य ति॥ सत्वमग्ने॥ १०॥ इति जपति॥ अक्षाग्निहोत्रीगां॥ अंधस्थ
रेवतीरमध्वम्॥ ११॥ इति प्रतिमन्त्रं ति॥ अथ तां॥ संहितासि विश्वरू
पूर्ज्जा मा विश गौपत्येनावतां॥ आलभते॥ अथ गार्हपत्यं गत्वा॥ उप २९
त्वाग्ने दिवे दिवे ११ राजंतमध्वराणां १३ सनः १४ अग्ने त्वम् १५ तं त्वा॥ ६
समस्मा द्विष्यते न तमुपतिष्ठते॥ ततः पुनस्तामेव गां॥ इड ६ एह्यदिते
एहि॥ प्रतिगच्छति॥ ततः तां॥ काम्या एत॥ मयि वः कामधरणं भू
यात्॥ १६ इत्यालभते॥ ततः अंतरेणापराग्नी गत्वा परेणाहवनी
यं प्राङ् तिष्ठन्नग्निमीक्षमाणो जपति॥ सोमानं १८ स्वरणम्॥ १९॥
योरेवान्॥ २०॥ मा नः २१ मह्नि त्रीणाम् २२ नहि तेषाम् २३ ते हि २४ कं
दाचन॥ २५ नस्त्वचितुः २६ इति सद्यत्परिलेपुरुभ २८ इति त्रि

वारंजपति॥ तत॥ ततोसिलंतुरसी ०इदंमेकर्मेदंवीर्यंपुत्रो अत्रस्यपु
त्रनामग्रहणमनुसंतनोतु॥ अविद्यमानेतुपुत्रे॥ इदंमेकर्मेदंवीर्यंतं
तवेत्यानसंतनोतु॥ इतिजपति॥ अथवैतस्यवास्सप्रोपस्थान
स्यस्थाने॥ क्षुल्लकोपस्थानंयथा॥ भूर्भुवः स्वः सुप्रजाः प्रजाभिः
स्याᳬ सुवीरो वीरैः सुपोषः पोषैः॥ इत्याहवनीयमुपतिष्ठते॥ अ
नेनैव गार्हपत्यंच॥ इदंविकल्पितंद्वयगोपक्षएव॥ तदपिसा
यमेवनप्रातः॥ अथ वास्सप्रोपस्थानप्रसंगेन प्रवत्स्यदुप
स्थानमुच्यते॥ ग्रामांतरेनगर्यांवापल्यांवान्यत्रवाक्वचित्
सीमामतीत्यचेद्रात्रोवासः प्रवसनंसमतन्निमित्तस्यकरध
णं॥ प्रवत्स्यन्यजमानः पंचभूसंस्कारपूर्वकमग्नीनुपस्थ
गार्हपत्यं॥ नर्यप्रजांमेपाहि॥ उपतिष्ठते॥ अथाहवनीयं॥ शंस्य

पशून्मेपाहि इत्युपतिष्ठते॥ अथदक्षिणाग्निं॥ अथर्य्यपितुंमेपाहि॥
इत्युपतिष्ठते॥ सभ्यायनमः॥ इतिसभ्यं॥ आवसथ्यायनमः इत्याव
सथ्यंनमस्कुर्यात्॥ ततो वा गमनेन गृहसीमांतं ग्रामसीमांतंवाली
सवाग्विसर्गः॥ यथाकालंगृहाभिमुखमोयाजमानंकुर्यात्॥ अग्नि
होत्रे॥ उदकभक्षणंत्यागः॥ पुनर्भक्षणंउपस्थानंइदंसमंत्रकं॥
अन्यत्सर्वमननसाचिंतनीयं॥ दर्शपौर्णमासयोरुद्धरणाद्यभिध्या
ने॥ प्राङ्मुखस्यव्रतग्रहणं॥ वपनंवा॥ इक्षुक्षीरचिकारांत्यभ
क्ष्यभोज्यानूयवांस्तथा॥ फलमूलानिचाश्नीयात्पर्वणि प्रोषि
तोग्निमान्॥ पराग्निपक्वंनाश्नीयात्तु गोरससमंतरा॥ असाम
र्थ्येशरीरस्यभक्ष्यद्रव्याद्यभावतः॥ स्यस्तत्यापन्येदन्नमश्नी
यात्प्रोषितोग्निमान्॥ अधः शयनं॥ प्रयाजानुमंत्रणं॥ स्वद्रव्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

परिस्यागः॥ मयीदमितिजपः॥ पूर्णपात्रग्रहणं॥ विष्णुक्रमक्रमणं॥ ५०
प्राङ्मुखेक्षणं॥ सूर्यावेक्षणं॥ प्रदक्षिणावर्तनं॥ प्रागमनं॥
पुत्रनामग्रहणं॥ व्रतविसर्गः॥ इदं सर्वं मंत्रवत्कार्यं॥ एवंवि
उपित्वयज्ञपञ्चाद्युष्टकादेः सर्वस्यगृहे क्रियमाणस्यनित्य
स्यासान्निपातिकं प्रोषितः कुर्यात्॥ सान्निपातिकं तु मनसा
चिंतयेत्॥ गृहे क्रियमाणेष्व्यादिसमाप्तिकालानंतरं भो
जनं पुनः प्रवासात् ग्रामसीमां गृहसीमां वाएत्य च
मस्यावाग्यमन ७ समित्पाणिरनुपेस्यकेचित्॥ स्नात्वा
ग्नीनुद्धृत्य॥ तत्राहवनीयं॥ आगन्मविश्ववेदसम
५० स्मभ्यंवसुवित्तमम्॥ अग्नेसंम्राडभिद्युम्नमभिसहआयछ

स्व॥ इत्युपतिष्ठते॥ उपविश्यतूष्णीं समिधमाधाय॥ परिसमूह
नं च॥ अथगार्हपत्यं॥ अयमग्निर्गृहपतिर्गार्हपत्यः प्रजायावसु
वित्तमः॥ अग्नेगृहपतेभिद्युम्नमभिसहआयछस्व॥ इत्युप
तिष्ठते॥ उपविश्यतूष्णीं समिधमाधायपरिसमूहनं च॥
अथदक्षिणाग्निं॥ अयमग्निः पुरीष्योरयिमान्पुष्टिवर्द्धनः॥ ५
अग्नेपुरीष्याभिद्युम्नमभिसहआयछस्व॥ इत्युपतिष्ठते॥
उपविश्यसमिधमाधायपरिसमूहनं॥ ततः सभ्यायनमः ५
आवसथ्यायनमः॥ इतिसभ्यावसथ्योपस्थानं॥ अथवाग
मनेआगमनेचतूष्णीमेवोपस्थानं॥ ततः स्वनिवासगृहं॥
गृहामाबिभीतमावेपध्वमूर्जं बिभ्रतएमसि॥ ऊर्जं बिभ्र
द्वः सुमनाः सुमेधा गृहानैमिमनसामोदमानः॥ येषामध्येतिप्र

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वसन्त्वेषुसौमनसोबभूथ॥ गृहानुपव्हयामहेतेनोजानंतुजानतः॥ ५१
उपहूताऽइहगावऽउपहूताऽअजावयः॥ अथोऽअन्नस्यकी
लालऽउपहूतोगृहेषुनः॥ इत्युपतिष्ठते॥ ततः क्षेमायवःशांत्यै
प्रपद्येशिवꣳशग्मꣳशंय्योःशंय्योः॥ इतिप्रविशति॥ पुत्रंदृष्ट्वा
जपति॥ अंगादंगात्संभवसिहृदयादधिजायसे॥ आत्मावैपुत्र
नामासिसजीवशरदःशतं॥ इति॥ अथास्यमूर्धानं॥ प्रजापते
ष्ट्वा॥ हिंकारेणावजिघ्रामिसहस्रायुषाहरदत्तस्यपुत्रनामदत्त
शर्मन्जीवशरदःशतं॥ इतिसव्यदवजिघ्रति॥ त्रि[illegible]॥
अथदक्षिणेस्यकर्णेजपति॥ अस्मेप्रयंधिमघवन्नृजीषिन्नि
न्द्ररायोविश्ववारस्यभूरेः॥ अस्मेशतꣳशरदोजीवसेधा अस्मे
५१ वीरांछश्वतइन्द्रशिप्रिन्॥ इति॥ अथसव्येकर्णेजपति॥

इन्द्रश्रेष्ठानिद्रविणानिधेहिचित्तिंदक्षस्यसुभगत्वमस्मे॥
पोषंरयीणामरिष्टिंतनूनाꣳस्वाद्मानंवाचःसुदिनत्वमह्नां॥
इति॥ अस्यपत्न्यस्तुमूर्धानमेवावजिघ्रन्तितूष्णीं॥ तदहर्गृह्या
णामपराधेसत्यपिनहिंसनं॥ अथाग्निहोत्रहोमः॥ तत्रप्रथ
मप्रयोगे॥ देशकालकीर्तनांतेसायंप्रातरग्निहोत्रहोमंकर्तुं
गणेशपूजनंस्वस्तिवाचनंमातृकापूजनंनांदीश्राद्धंचाहंकरि
ष्ये॥ इतिसंकल्प्य॥ अनस्तमितानुदितयोरध्वर्युप्रतियज
मानः॥ उद्धर॥ इतिब्रूयात्॥ स्वयंहोमपक्षेप्रेषाभावः॥ पंच
भूसंस्कारपूर्वकंगार्हपत्यादाहवनीयस्योद्धरणं॥ नमस्तमि
तानुदितयोःप्राङ्मुखोनिदध्यात्॥ एवमेवदक्षिणाग्निं॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दक्षिणसंहरणपक्षे निःसो दक्षिणाग्निः॥ सर्वेग्नलध्मियः निःस्याः ॥ ५२
अथ संध्योत्तरं अंतरेण परागग्नी गत्वा दक्षिणवाग्र दक्षिणेणमा
हवनीयं परिस्योपविश्यति यजमानः॥ पत्नी च पूर्ववत्॥ यथादे
ह्रं॥ वर्हिरसि व्रूयमे पा[illegible]प्मानं॥ सत्येन व्रतमुपेम्यापः सूर्ये
मयि व्रतम्॥ इत्यप आचमति॥ वाचं यच्छति च॥ अध्वर्युः॥
अपरेणाहवनीयं कूर्चं निदधाति॥ कुशमन्वा॥ परिस्तरणं॥
सर्वेषामाहवनीयगार्हपत्यदक्षिणाग्नीनां आहवनीयं पर्यु
क्ष्योदकधारां निनयस्यागार्हपत्यात्तं च ततो दक्षिणाग्निं
पर्युक्षेत्॥ प्रातस्तु प्रथमं गार्हपत्यं पर्युक्ष्य॥ ततो दक्षि
५२ णाग्निं पर्युक्ष्य गार्हपत्यादाहवनीयं यावत्संततोदकधारां

नीत्वाहवनीयं पर्युक्षेत्॥ सायमप्येवं वा॥ पयोहोमपक्षे ध्वर्युः॥
वाग्यत आहोमात् गां धुक्ष्व॥ इत्यग्न्दोग्धारं प्रेषयति॥ स प्रात्रे
वर्णिकवत्स्यामूर्ध्वकपालायां स्थाल्यां पुनः पत्नीं विहायवरा दक्षि
णतः प्राङ्मुखं वी वोदङ्मुखं वी दोग्धि॥ अध्वर्युर्दुग्धं पूर्वेणा
हवनीयमाहृत्य गार्हपत्येऽधिश्रयत्युत्तरतो निरस्यागारान्
तेषु॥ नहैनावज्योत्स्यापः पुनरवज्योत्स्य निधायत्रिरु
द्वासनमस्य पदकं॥ एवमन्यत्रापि होमार्थस्याहरणं दक्षिणेन
वौषधं हुत्वा गार्हपत्योदकं निदधाति॥ दर्भस्तंडुलानां
चेनाधिश्रयणं घृतोत्सनातं॥ यवाग्वां नोदकासेकः॥ अ
स्तमितेजुहोति सायं प्रातरनुदितेच॥ वैकंकतं स्रुवं स्रु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

चेत्प्रतप्य॥ पाणिना संमार्ष्टि पुनः प्रतप्य॥ उन्नेष्यामि॥ इत्याह॥ यज ५२
मानस्तिष्ठन् ॐ उन्नय॥ इत्यालिप्रस्याह॥ अध्वर्युर्वामहस्तस्थाग्निहो
त्रहवण्यां चतुरः स्रुवानुन्नयति॥ यमदग्निप्रवरस्य तां पञ्च॥ स्थाल्यं
परिशिनष्टि तद्ब्राह्मणः पिबेत् होमान्तेनाब्राह्मणः॥ स्रुग्दण्डोपर्यंगु
ल्यन्तरितां समिधं धारयन्नाधीं मध्ये गार्हपत्यादाहवनीयं
हरति मुखमात्रे धारयन्मध्ये निगृह्योर्ध्वोपविश्य॥ अग्निर्ज्यो
तिषं त्वा वायुमतीं प्राणवतीं स्वर्ग्यां स्वर्गायोपदधामि भास्वती
म्॥ इत्याहवनीये समिधमादधाति॥ प्रातस्तु॥ सूर्यं ज्योतिषस्त्वा॥
इत्यग्निपदे सूर्यपदप्रक्षेपः॥ प्रदीप्तामभि॥ अग्निर्ज्योतिर्ज्योति
रग्निः स्वाहा॥ सजूर्देवेन सवित्रा सजू रात्र्येन्द्रवत्या॥ जुषाणो
५२ अग्निर्वेतु स्वाहा॥ इति वा॥ ब्रह्मवर्चसकामस्य तु॥ अग्निर्व

र्चो ज्योतिर्वर्चः स्वाहा॥ इति॥ इत्येकं जुहोति॥ यजमानः॥ इदमग्नये न म
म॥ प्रातस्तु॥ सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहा॥ सजूर्देवेन सवित्रा सजूरुष
सेन्द्रवत्या॥ जुषाणः सूर्यो वेतु स्वाहा॥ इति वा॥ ब्रह्मवर्चसकामस्य॥ सूर्यो
वर्चो ज्योतिर्वर्चः स्वाहा॥ इति॥ इत्येकं जुहोति॥ इदं सूर्याय न मम॥ स्रुचं
कूर्चे निधाय गार्हपत्यमवेक्षते होष्यन्नस्मिन्॥ अस्मिन्नहोष्यं ध्येन्नि निदधा
ति गार्हपत्यमवेक्षते च॥ पुनः स्रुचमादाय प्रजापतिं ध्यायन् पूर्वाहुतेरुप
संसृष्टां भूयसीं तूष्णीमुत्तराहुतिं मनसैव रुद्रं प्रजापतये न ममेति त्या
गः॥ उत्तराहुतेर्भूयिष्ठं स्रुचि परिशिनष्टि॥ स्रुचं द्विः प्रकम्प्य कूर्चे नि
दधाति॥ सव्येन पाणिना स्रुक्बिलमनामिकाग्रस्य उपमज्य कूर्चोत्तरभागे॥
नमो देवेभ्यः॥ इति मन्त्रेण निमार्ष्टि॥ उत्तानेनैव हस्तेन॥ तुल्येधोभागेनै
व पुनः स्रुक्बिलमनामिकाग्रस्य उपमज्य कूर्चस्य दक्षिणतो भस्मावे वोत्ता
नं पाणिं निधाय॥ स्वधा पितृभ्यः॥ इति मन्त्रेण कूर्चे दक्षिणतो निमार्ष्टि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपउपस्थस्य॥ गार्हपत्येतिष्ठंस्तसमिधमाधायोत्तरत उपविश्य दक्षिणंजा ५४
न्वाच्य॥ स्थाल्यास्रुवेण॥ इहपुष्टिंपुष्टिपतिर्दधातिह प्रजां॥ इमयत्नु प्रजा
पतिः॥ सजूर्देवेन सवित्रा सजूरुषसेंद्रवत्या॥ जुषाणः सूर्यो वेतु स्वाहा॥
इतिवा॥ ब्रह्मवर्चसकामस्यतु॥ सूर्यो वर्चो ज्योतिर्वर्चः॥ स्वाहा॥ इति
अग्नयेगृहपतयेरयिमतेपुष्टिपतयेस्वाहा॥ इतिजुहोति॥ इदमग्नये
गृहपतये रयिमते पुष्टिपतयेनमम॥ इति त्यागः॥ स्थाल्याः स्रुवेणैव॥
प्रजापतिंध्यायन्नुत्तराहुतिः॥ इदंप्रजापतयेनमम॥ दक्षिणाग्नेरुदक्
तिष्ठन् समिधमाधायाउदगुपविश्य दक्षिणंजान्वाच्य स्थाल्याः स्रुवेणै
व॥ अग्नये न्नादायान्नपतयेस्वाहा॥ इतिजुहोति॥ इदमग्नयेन्नादा
यान्नपतयेनमम॥ इतित्यजति॥ पूर्ववद्द्वितीयां॥ स्रुचमादाय शालाया
वहिर्निष्क्रम्योपविष्टः स्रुक्स्थं हुतशेषमनामिकया प्राश्याचम्यपुन
रनामिकया प्राश्याचम्य शेषं स्रुक्संपात्रं तरेण स्नेवावृत्त्वा प्राश्यपा
५४

त्रं हस्तं वा सव्ये नियकृत्य निर्लेप्याचम्याहवनीयस्य पश्चादुपविश्य स्रुचम
द्भिः संपूर्य॥ देवान्जिन्व॥ इत्याहवनीयस्योत्तरत उत्सिंचति॥ द्वितीयवारं सं
पूर्य॥ पितृन्जिन्व॥ इत्यत्सिंचति॥ तृतीयां संपूर्य॥ सप्तर्षिन्जिन्व॥ इति
शाल्यामुदक्षतिउच्चैः॥ चतुर्थीं संपूर्य कूर्चस्थाने त्रिर्निषिंचति प्राक्
संस्थं॥ अग्नये पृथिवीक्षिते स्वाहा॥ इति प्रथमं॥ पृथिव्या अम्नं तं जु
होमि स्वाहा इति द्वितीयं॥ अंमले अम्नं तं जुहोमि स्वाहा॥ इति तृतीयं॥
स्रुक्कूर्चमाहवनीये सहैव प्रलयनिदधाति॥ ततः॥ समिदसिस
मिधो मेधुग्ने दीदिहि समेद्धाते अग्ने दीद्यासं॥ इति मंत्रेण॥ समिध
मादधाति॥ यथापूर्युक्षितं॥ प्रातः प्राक्संस्थं समित्पर्युक्षणं॥ अ
थ यजमानः॥ तृष्णीमाहवनीयमुपस्थाय तत्समीप उपविशनं॥ गार्हप
त्यं चोपस्थाय तत्रोपवेशनं॥ ततः इंद्रायाहवनीयाय नमः॥ इत्याहवनीय
नमस्कारः॥ यमाय राज्ञे गार्हपत्याय नमः॥ इति गार्हपत्य नमस्कारः ५५

पूर्ववस्त्वर्युक्षणमध्वर्यूणा ॥ यजमानः वाचंवस्सृज्य ॥ विद्युदसिविमेपा ५५
प्मानंजघ्यपोवभृथमभ्यूपैन्निमयिसस्वंगोपुमेव्रतम् ॥ यस्याच्चामति ॥
यथाभक्तिसंव्रजन् ॥ मनसोपस्पृत्य दक्षिणाग्निं ॥ नगयनेषधाया
न्याहार्यपचनायनमः ॥ इतिदक्षिणाग्निनमस्कारः ॥ अनद्भिरखा
प्रालर्मुहूर्तः सभासनं ॥ सभ्यस्योपस्थानं ॥ सांगमननायसभ्यो
यनमः ॥ इतिनमस्कारः ॥ भस्मोद्धूलमुपेयात् ॥ अस्वतेपांसवायन
मः ॥ स्वयंपाज्जुहुयात् ॥ उपवसथेनियमः ॥ ततः स्मार्तहोमः ॥ इ
तिसायंप्रातरग्निहोत्रहोमः ॥ अथकाम्यहोमकालाः ॥ तत्रास्तम
योदयसमीपेस्वर्गकामस्य ॥ आयुःकामस्यसायंमंधकारस्या
गमेप्रातरंमिधकारेगच्छति ॥ पशुकामस्यसामंपशुग्रामेप्रतिष्ठे
षुप्रातरनिर्गमेषु ॥ श्रीकामस्यप्रातःश्रायनेएयलोके ॥ अथकाम्या
५५ न्यवस्थाः ॥ प्रजाभ्योबलान्नादिजिघृक्षोराज्ञः प्रथमज्वालानि

र्गमेधूप्यमानोनो ॥ प्रजाः बध्याधनादिजिघृक्षोस्तुभूयिष्ठार्चिषि ॥ प्र
दीप्ततमेश्रीकामस्यरूयशः कामस्यच ॥ प्रजाभ्योमैत्रेणधनादिलि
प्सोर्यजमानस्यज्वालापसरणे ॥ अंगारेषुच्चाकर्षमानेषुब्रह्मवर्च
सकामस्य ॥ अथकाम्यद्रव्याणि ॥ पयसास्वर्गकामः ॥ पशुकामोवा ॥
यवाग्वाग्रामकामः ॥ तंडुलैर्बलकामः ॥ दध्नेंद्रियकामः ॥ घृतेन
तेजस्कामः ॥ इतिचतुर्थोध्यायः ॥ अत्रोपयुक्तंकिंचिदुच्यते ॥
सर्वेषुकाम्येषुनित्येषुवायेनहोत्राद्रव्येणचसायंहुतंतेनैवप्रात
र्होतव्यं ॥ सायंहोमेषुयद्द्रव्यंप्रातर्होमेषुतभ्दवेत् ॥ भिन्नद्रव्यंहुतेय
त्तुआहुतंतस्यतभ्दवेदितियज्ञपार्श्वोक्तेः ॥ अथहोमकर्तृनियमः ॥
अन्यैःशतहुताद्धोमादेकः शिष्यहुतोवरं ॥ शिष्यैःशतहुताद्धोमादे
कःपुत्रहुतोवरं ॥ पुत्रैःशतहुताद्धोमादेकःस्वात्महुतोवरमिति ॥
मनुः ॥ नैवकन्यानयद्यवतिर्नाल्पविद्योनबालिशः ॥ होता ॥ स्याद

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ग्निहोत्रस्य नार्त्तीनां संस्कृतस्तथा ॥ नरकं हि पतंत्येते जुह्वतश्च ५५
यस्य तत् ॥ तस्माद्वितानकुशलो होता स्याद्वेदपारग इति ॥ दक्षोपि ॥
ऋत्विक्पुत्रो गुरुर्भ्राता भागिनेयोथ विट्पतिः ॥ एतैरपि हुतं य
स्मात्तद्धुतं स्वयमेव तु ॥ एतैर्दंपत्योरन्यतरसंन्निधाने होतव्यं ॥
तदाह कात्यायनः ॥ असमक्षं तु दंपत्योर्होतव्यं नार्त्विगादिना ॥
द्वयोरप्यसमक्षं तु भवेद्धुतमनर्थकं इति ॥ होमद्रव्याणि स्मृ
त्यर्थसारे ॥ पयोदधियवागूश्च सर्पिरोदनतंडुलाः ॥ सोमो
मांसं तैलमापोदश्शैतान्यग्निहोत्रके ॥ स्याद्दग्निहोत्रवद्गृह्ये
संस्कारो मंत्रवर्जितः ॥ यद्वाग्निः प्रोक्षणं तेषां मांसमोपा
५५ सनेन च ॥ शालिः श्यामाकनीवारा व्रीहिगोधूमयावकाः ॥ एते

षां तंडुला होम्या यावनालप्रियंगवः ॥ प्रियंगवः शालयश्च गोधू
मा व्रीहयो यवाः ॥ स्वरूपेणापि होम्याः स्युः स्वरूपेणैव वै तिलाः ॥
छंदोगपरिशिष्टे च हविष्येषु यवाः प्रोक्तास्तदनु व्रीहयः स्मृताः ५
माषकोद्रवगौरादीन् सर्वालाभेपि वर्जयेत् ॥ तत्रैव ॥ कृतमो
दनसक्त्वादि तंडुलादि प्रसादकृतं ॥ व्रीह्यादिचाप्यतं प्रोक्तमि
ति हव्यं त्रिधा स्मृतमिति ॥ एवं च स्थालीपाकेन यवा
ग्वादिना होमादि स्वयं न कर्तव्यं ॥ तंडुलादिना स्वयं कर्त
व्यं ॥ तथा च कात्यायनः ॥ स्थालीकर्मणा गृह्यः संध्यादीनां
विधीयते ॥ होमः श्रौते तु कर्त्तव्यः शुष्कान्नेनापि वा फलैरिति
ग्रे लपुराणेपि ॥ पर्वहोमेषु पक्षादौ यागकाल उपस्थिते ॥ शुष्का
न्नेन फलैर्वापि यजतां च यथाक्रममित्याद्यो च्चाभावयुक्तः ॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पंचमहायज्ञानुस्नकृशुक्रांनेनापि न कर्त्तव्याः॥ पंचयज्ञविधा
नं च न कुर्यान्मृत्युजन्मनोरिति जातूकर्णोक्तेः॥ संध्यापं ५८
च महायज्ञान्नैत्यकं स्मार्त्तिकमेव च॥ तन्मध्ये हापयेदेष आ
शौचांते लिततक्रियेति जाबालोक्तेश्च॥ संध्यायांतु विप्रे
पो भारद्वाजेनोक्तः॥ सूतकेमृतकेकुर्यात्प्राणायाममम
त्रकं॥ तथा मार्जनमंत्रांश्च मनसोच्चार्य मार्जयेत्॥ गा
यत्रीं सम्यगुच्चार्य सूर्यायार्घ्यं निवेदयेत्॥ मार्जनंतु नवा कार्यो
मुपस्थानं न चैव हीति॥ आश्वलायनाः॥ आपन्नश्चाशुचिः
काले तिष्ठन्नपि जपेद्दश॥ गायत्रीमिति शेषः॥ अग्निस्नातो
५८ वेद्यर्घ्यस्यावस्यकलोक्ताः॥ जलाभावे महामार्गे बंधने च
शुच्यावपि॥ उभयोः संध्ययोः काले रजसा वार्घ्यमुत्सृजेदि

ति॥ होमेष्वपादेर्गोणकालमाह बोधायनः॥ आसायं कर्मणः प्रात
रा प्रातः सायकर्मणः॥ आकुतिर्नातिपद्यत पार्वणं पार्वणं तू शदि
ति॥ तथा॥ अथ काले वैश्वदेवेच्चेद स्वमेति गभस्तिमान्॥ वैश्व
देवः ततः कृत्वा सायंहोमं समाचरेत्॥ कालातीतेषु सर्वेषु प्रा
वश्चित्तरेव च॥ कालातीतानि वर्त्येव विदध्यादुत्तराणि च॥ अ
त्र त्रिकांडमंडनः॥ मुख्यकाले यदावश्यं कर्म कर्त्तुं न शक्यते॥
गोणकालेपि कर्त्तव्यं गोणोप्यत्र दृशो भवेत्॥ आसायमाहु
तेः कालात्कालस्यात्प्रातराहुतेः॥ पोर्णमासस्य कालोस्ति
पुरादर्शस्य कालतः॥ पोर्णमासस्य कालात्प्राकूदर्शका
लोपि विद्यते॥ वैश्वदेवस्य कालोस्ति प्राकूप्रघासविधानतः॥
प्रघासान्नांच्य कालोस्या साकमेधीय कालतः॥ [illegible] स्यात्सा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कमेध कालोप्याशुनासीरीयकालतः ।। शुनासीरीयकाले ५८
प्यावेश्वदेवीकफाललः ।। श्यामाकेष्टीहि भिश्येवय वैरन्योन्य
कालतः ।। प्राग्यष्टुं युज्यते वश्यंनस्वत्राग्रायुएगास्ययः ।। दक्षि
णायनेकाले यापश्चिज्यायोत्तरायने ।। अन्योन्यकालतः पू
र्वं यष्टुं उक्ते उभेवपि ।। एवमागामीययागमुख्यकालादधस्त
नः ।। स्वकालादुत्तरो गौणः कालस्यात्सर्वकर्मणः ।। यद्वागा
मिक्रियामुख्यकालस्यान्यंतरालयत् ।। गौणकालत्वमिष्टं
ति केचित्साधकनकर्मणि ।। गौणष्वलेषुकालेषु कर्मचोदितमा
चरेत् ।। प्रायश्चित्तप्रकरणप्रोक्तान्निइष्टलिमाचरेत् ।। प्रा
यश्चित्तमवृत्त्वावागौणकाले समाचरेत् ।। नित्येष्टिम
५८ ग्निहोत्रंचभारद्वाजीयभाष्यतः ।। मुख्यकाले हि मुख्यं

चेत्साधानं नैवलभ्यते ।। न कालद्रव्ययोः ।। कस्यगौणत्वं मुख्य
नापिवा ।। मुख्यकालमुपाश्रित्य गौणमप्यस्तु साधने ।। न मु
ख्यद्रव्यलोभेन गौणकालप्रतीक्षणमिति ।। होमेविशेषस्त्वेव १।
एकपक्षगतो यावान्होमसंघोलिपयते ।। पक्षहोमविधानां
तेउक्त्वा तंतुमतीयजेत् ।। स्वकालोत्कर्षतः कश्चिद्गौणका
लो निरूपितः ।। अपकर्षादथान्योपि गौणकालो निरूप्यते ।।
आमयव्याप्तिमानायद्वतो बाध्वगतोपिवा ।। राष्ट्रक्षोभेधना
भावेरुरुगेहे वसन्नपि ।। अन्येष्वेवंप्रकारेषु निमित्तेष्वागते
षु च ।। समासमाग्निहोत्राणां यथासंभवमाचरेत् ।। अनातु
रोप्रवासी च निश्चिंतो निरुपद्रवः ।। पक्षहोमं तु यः कुर्यात्स
चरेत्पतितव्रतं ।। निमित्तानामिहैतेषां निर्दिश्यते कायदुच्यते ।।

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तत्सर्वेषु निमित्तेषु जानीयात्प्रतिपादितं ॥ पक्षहोमान शेषान्वा शेष ५९
होमानथापि वा ॥ समस्य जुहुयात्तत्र प्रयोगोयं निरूप्यते ॥ प्रति
पद्युक्तये सायमापद्याय त्रवादिने ॥ यावंत्योपवसथ्याहास्त्राद्वि
नानि भवंति हि ॥ तावंति परिगृह्णीयाच्चतुरं त्रयमानि चे ॥ पा
त्रांतरसहायौ वा नित्यायां प्राक्तनस्रुचि ॥ स्थूलस्रुगंतरं वापि
स्यात्तत्र समुन्नयेत् ॥ एका समित्सकृद्धोमः सकृद्देवनिर्मार्जनं ॥
उपस्थानं सकृत्कार्यं शेषाप्रवृत्तिरिष्यते ॥ एवमेवोत्तरस्यान्हिप्रा
तर्होमां समस्यतु ॥ जुहोत्युपवसथ्याहं प्रातर्होमावधीन् सकृ
त् ॥ समारोपविधानेन समारोपयतेनलान् ॥ तिधार्यंतेथवा
५९ धार्याधारयंत्येव पूर्ववत् ॥ एवंप्रतिपदोन्यत्र यत्रापद्युपजायते ॥
तथैवोपवसथ्याहास्त्राग्यत्रापद्दिनद्वयंति ॥ तृतीयायां चतुर्थ्यां

वा पंचम्यां वा परत्र च ॥ तदादीनां तदंतानां होमानां स्यात्समासता ॥
आपदेवावधिर्होमः समासस्याभ्युपेयते ॥ तस्मात्कदाचिदारभ्य
यावत्तस्तावतो पि वा ॥ आपत्कालसमान्होमान्समस्येदेकपक्षगान् ॥
अत एव द्विरात्राय त्रिरात्रायाधिकाय च ॥ समस्य जुहुयाद्धोमानि
त्येवं पद्यते कठैः ॥ प्रवासिनोग्निहोत्रस्य पंचाहं सप्त वा पुनः ॥ सा
यं प्रातः पृथग्घोम एकस्मिन्नहनीव च ॥ एवमेकत्र पक्षेहे होमा
स्तेषामशेषतः ॥ न्यूनानां वा समासः स्यान्न पक्षांतरवर्तिभिः ॥
सर्वथोपवसथ्याहे सायंहोमोपि पृथक् भवेत् ॥ तथैव यजनीय
हे प्रातर्होमः पृथक् भवेत् ॥ पर्वोपवासभ्रन्यं चेत्प्राप्तं केनापि
हेतुना ॥ तदा तत्सायंहोमोपि पूर्वैः सह समस्यते ॥ तावतानापद्
स घेच्चेदापत्पक्षांतरे पि च ॥ पुनस्तत्रापि कर्त्तव्यः समासः पृथग्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वहि॥ नतुपक्षांतरस्थानां समासश्चोपद्यते मिथः॥ एवमापन्नः पक्षे
पक्षेच्चैवं समाचरेत्॥ तृतीयेनंतरे पक्षे समासं न समाचरेत्॥ तावता ५०
नापन्नश्चेच्चेदापत्पक्षे तृतीयके॥ दृष्टेणापि निवर्त्येत तत्र होमं दिने
दिने॥ पक्षांतरे पुनः कर्म पक्षहोमादिमाचरेत्॥ कंठेः पक्षद्वयं त्वे
वपक्षहोमो नियम्यते॥ आपच्चेदनुवर्त्तेत दीर्घकालं कथंचन॥
यावज्जीवमविच्छिन्नान्पक्षहोमान्समाचरेत्॥ आपदेत्वाव
धिस्तत्र न पक्षगणनावधिः॥ अथापरः समासस्य प्रकारः
प्रतिपद्यते॥ सायंप्रातस्तनौ होमावुभौ सायं समस्य तु॥ आ
पन्नोजुहुयात्तत्र समिदेकाथवा द्वयं॥ सायंहोमस्य मुख्यत्वा
५० त्तदीयं तंत्रमिष्यते॥ पक्षहोमादिकाः पूर्वमापत्त्वं त्यागरू

पिताः॥ सायंप्रातः कालभेदसंपाद्याः सर्वएवते॥ आपद्दुर
त्त्वमालोच्य कदाचित्सायमेवते॥ उभयेपि समस्यंते सायं
प्रातस्तनाअपि॥ प्रातर्होमादिकायद्वा प्रातश्चेदापदागता॥
तथापूर्वापराण्हादौ निमित्ते सति चेष्यते॥ दीर्घकाला
पदं मत्वा पक्षहोमे कृते सति॥ तत्रांतरालेयद्यापत्कदा
चिदपगच्छति॥ कालेकालेपुनर्होमान्जुहुयात्प्राग्घुतान
पि॥ कंठेष्वेवं विदुः केचिन्नेच्छंत्यन्ये पुनर्हुतमिति॥ कात्या
यनः॥ पौर्णमासात्यये होम्यं होता वा यदहर्भवेत्॥ तदहे
र्जुहुयाद्देवममावास्यात्ययेपि च॥ अहूयमानेनभ्वंभ्येन
नयेत्कालं समाहितः॥ संपन्नेतु यथा तत्र हुयते यदिहो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

च्यते॥ अकृताः परिसंख्याय पात्रे कृत्वाऽऽहुतिः सकृत्॥ ६१॥
मंत्रेण विधिवद्धुत्वैव मे वा परा अपीति॥ पिंडपितृयज्ञ
स्य गौणकालाभावात्तदतिक्रमे वैश्वानरेष्टिः प्रायश्चि
त्तमेवेति वक्ष्यते॥ इति गौणकालः॥ तत्राप्यसंभा
वनायां प्रतिपदि सायं देशकालकीर्तनांते अद्याघा
ग्राभिपर्वपूर्वदिनसायंहोमांत सायंहोमान् समस्या
नाहं करिष्ये॥ इति संकल्प्य॥ प्रतिपदादिपर्वपूर्वदिनां
तदिनगणन" यापात्रांतरस्थायां यामग्निहोत्रहवण्या
६१ मन्यस्यां वा स्थालायां स्रुचि चतुरुन्नयदि गृहीत्वैकांस नानि

मिधं धारयन् पूर्ववत्सायंहोमः कर्त्तव्यः॥ एवं द्वितीयायां प्रातर्दे
शकालकीर्त्तनांते अद्याघाग्राभिपर्वप्रातर्होमांत प्रातर्हो
मान्समस्याहं करिष्ये॥ इति संकल्प्य॥ द्वितीयादिपर्वदि
नांगणनया पूर्ववच्चतुरुन्नयनानि गृहीत्वैकांसमिधं धा
रयन् पूर्ववत्प्रातर्होमः कर्त्तव्यः॥ प्रातर्होमासंभवभावना
यांतु प्रतिपदि सायमेव देशकालकीर्त्तनांते आद्या
घाग्राभिपर्वप्रातर्होमांत सायंप्रातर्होमान्समस्याहं
करिष्ये॥ इति संकल्प्य॥ प्रतिपत्सायमादिपर्वप्रातरं
तसायंकालगणनया चतुरुन्नयनानि गृहीत्वैकांसमि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

धंसमिद्द्वयंवा धारयन्पूर्ववत्सायंतनाहुतिं शेषं पात्रांत
रेनिक्षिप्यएवमेव द्वितीयादिपर्वप्रातरंतप्रातःकाल
गणनयाच्चतुरन्नयनानिगृहीत्वा प्रातराहुतिंहुत्वा
पात्रांतरस्थंशुचि गृहीत्वा तत्रैणैत्तराहुतिः॥ अथ
प्रातरेवापदागमश्चेद्वितीयायां प्रातरेवाघाप्या
गामिपर्वप्रातरंतप्रातःसायंहोमान्समस्याहंकरि
ष्ये॥ इति संकल्प्य॥ द्वितीयाप्रातरादिपर्वप्रातरंत
प्रातःसायंकालगणनयाचतुरन्नयानिगृहीत्वे
कांसमिधंसमिद्द्वयंवापरिधारयन्पूर्ववत्सायंतन

६२

तंत्रेणहोमःकर्त्तव्यः॥ तत्राप्यादौपूर्ववत्त्वत्स्तोप्रातराहुतिः॥ पश्चा
त्सायमाहुतिःतंत्रेणैवोत्तरा॥ एवंयदेवापदागमःपूर्वाह्णेपराह्णेदो
तदेवापन्निर्गमांतंसायंप्रातर्होमाःकर्त्तव्याः॥ अथयदाकदाचि
त्सायमेवाव्यग्रःप्रातर्होमेनसमस्यसायंहोमंकरिष्येइतिसंक
ल्प्यपूर्ववत्सायंतनतंत्रेणहोमःकर्त्तव्यः॥ तत्रचतुरन्नयनद्वयं॥
समिदेकांसमिद्द्वयंवा॥ कदाचिदापत्सुतरस्येपर्वणिप्रलाप्यसंभ
वनात्तदापर्धसायंहोमोपिपूर्वैःहोमैः॥ समस्यकर्त्तव्यः॥ एवमेवातिक्रां
तहोमेष्वपि॥ दशकालकीर्तनांते॥ अतिक्रांतेतद्दिनाद्यावधिसायं
प्रातर्होमानहंकरिष्ये॥ इतिसंकल्प्य॥ अतिक्रांतसायंप्रातर्होमगण
नयाचतुरन्नयनानिपृथग्गृहीत्वापूर्ववज्जुहुयात्॥ एवमाहवनीये
होमंविधायगार्हपत्यदक्षिणाग्न्योरपिपात्रांतरेआगमिनामति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्रांतानांवाहोमानांगणेनयास्रुवेणहोमद्रव्यंगृहीत्वासमिदाधानपूर्व ६७
कंपूर्णाहुतिंहुत्वापुनस्तथैवादायोत्तरांजुहुयात्॥ एवंपौर्णमासोति
क्रांतौदर्शात्प्राक्कर्त्तव्यः॥ दर्शयागोतिक्रांतश्चेत्पौर्णमासात्प्रा
क्कर्त्तव्यः॥ श्रीष्माग्रयणंयवाग्रयणकालात्प्राक्कर्त्तव्यं॥ यवा
ग्रयणंचश्रीष्माग्रयणात्प्राक्कर्त्तव्यं॥ एवंचातुर्मास्येष्वपिपूर्वं
पूर्वंपर्वणित्तरोत्तरपर्वकालात्प्राक्कर्त्तव्यं॥ अत्रदर्शपौर्णमासाग्र
यणचातुर्मास्येष्टीनांकालातिक्रमे अग्नयेपथिकृतेष्टाकपालः॥
पुरोडाशः प्रायश्चित्तंप्रज्ञातेष्ट्यतिपत्तौचेति सूत्रे एवोक्तं॥ तथा
पिंडपितृयज्ञातिक्रमे वैश्वदेवहृत्यातिक्रमे अकृताग्रयणस्यनवा
६७ न्नभोजनेच वैश्वानरेष्टिः प्रायश्चित्तं॥ तथाह कात्यायनः॥

परेणाग्नौहुतेस्वार्थंपरस्याग्नौहुतेस्वयं॥ पितृयज्ञात्ययेचैव वै
श्वदेवद्वयस्यच॥ अनिष्ट्वानवयज्ञेननवान्नप्राशनेतथा॥ भोजने
पतितान्नस्यचरुर्वैश्वानरोभवेदिति॥ अनाहिताग्नेश्चरुः॥
आहिताग्नेस्त्विष्टिरेव॥ महायज्ञान्विनाभोजनेकृच्छ्रार्द्धं॥ तद्वि
केकाकरणात्यपवासः धनिनः कृच्छ्रार्द्धं॥ पर्वण्युपस्थानलो
पेचैवं॥ अन्याधायकर्मकुर्वतस्त्रिरात्रोपवासः॥ दर्शपौ
र्णमासयोरुभयोर्लोपेकृच्छ्रार्द्धं॥ तयोरेकतरलोपेपा
दकृच्छ्रं॥ आग्रयणलोपेकृच्छ्रं॥ नित्यस्नानलोपे संध्या
लोपेनित्यहोमलोपेच गायत्र्या अष्टोत्तरसहस्रंजपः॥
दर्शपौर्णमासेचपराग्निपक्वभोजनेग्निनाशः स्यात्तेपि॥

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इति नृसिंहसंस्कारसमाप्तं ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ६४

संव १८८० शाके १७४५ सुभानुनामाब्दे आश्विन व
छ सप्तम्यां रवौ तद्दिने समाप्तं ॥ इदं पुस्तकं जगन्ना
थ भट जोसि अग्निहोत्री उंब्रावतीकरस्येदं पुस्तकं
मघंह्नाथकु कदेवलजनार्दनबावा रामजयराम
जयजय राम ॥ छ ॥

६४

[OrderDescription]
,CREATED=23.07.19 13:35
,TRANSFERRED=2019/07/23 at 13:52:42
,PAGES=66
,TYPE=STD
,NAME=S0001083
,Book Name=M-1937-NRISINGH SANSKAR
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection